शां० । **प्राण०** **मदनः** कामः । **संनाहं** कवचम् । **अभजदिव** गृहीतवानिव । कस्मात् हेतोः **प्राणसमाः** जीवितकल्पाः[1] **स्वाः** स्वकीया **दयिताः** भार्याः यः जनः लोकः **त्यजति** मुञ्चति । कीदृशः सन् ? **शुचं** शोकं **समास्वादयिता** अनुभविता । **तं** जनं **खलु** निश्चयेन **दिवसं** दिनमभिव्याप्य[2] **न क्षमे** न मर्षयामि **इति** हेतोः ॥१४॥

पु० । **इति** हेतोः **मदनः** कामः **अग्र्यम्** उत्कृष्टं सञ्जत्वम् **अभजत् इव** श्रितवान् इव । किम् इति **जनः** लोकः प्राणतुल्याः **स्वाः** आत्मीयाः **दयिताः** कान्ताः संत्यजति । कीदृशः ? **शुचं समास्वादयिता** शोकमनुभविता । **तं दिवसं** प्रियशून्यं दिनं **न** खलु सहे **क्षमे** । समास्वादयिता इति तृन्, अतः शुचम् इति द्वितीया ॥१४॥

व्यभ्रे खे दयमानः कुमुदानां प्रोषितांश्च खेदयमानः ।
धाक्षीन् माऽऽनन्दयिता शशीति मुमुचुः प्रियेषु मानं दयिताः ॥१५॥

शां० । **व्यभ्रे०** **प्रियेषु** भर्तृषु [3]विषये[3] **दयिताः** वल्लभाः इति [4]कारणात्[4] **मानम्** अहंकारं **मुमुचुः** मुक्तवत्यः । कस्मात् इव ? **शशी** चन्द्रः, कीदृशः **कुमुदानां** कैरवाणाम् **आनन्दयिता** विकासकः तथा **दयमानः** वर्धयमानः उदयमानः वा **खे** आकाशे कीदृशे **व्यभ्रे** विगतमेघे । तथा **खेदयमानः** कान् **प्रोषितान्** प्रवासितान् यद्वा **तद्भार्याः धाक्षीत्** मा भस्मसात् अकार्षीत् अस्मादिति हेतोः ॥१५॥

---

१. म० 'जीविततुल्याः' ।
२. म० 'दिनाग्रमव्याप्य' अस्ति ।
३–३. म० प्रतौ नास्ति ।
४–४. क्षा० प्रतौ नास्ति ।

पु० । **दयिताः** प्रिया **प्रियेषु** कान्तेषु **मानम्** ईर्ष्या कोपं **मुमुक्षुः** तत्यजुः। कुतः इति चेत् **शशी मा धाक्षीत्** इति धक्ष्यति इति आशङ्कया । कीदृक् सखी: आनन्दयिता असि वल्लभानां सुखयिता । **व्यभ्रे** निर्मेघे **खे** व्योम्नि स्थितः **कुमुदानां दयमानः** कैरवाणि अनुगृह्णन् तथा **प्रोषितान्** प्रवासिनः **खेदयमानः** क्लिश्नन् इति । **कुमुदानां** "अधीगर्थदयेषाम् [कर्मणि]" [पा० २. ३. ५२] इति षष्ठी । **धाक्षीत्** इति दहतेः लुङ् । "न माङ्योगे" [पा. ६. ४. ७४] अडभावः । माङ् आशंसायाम् ॥१५॥

[1]आनन्दसमाजगतः ज्योत्स्नेति जनः पपौ मधु समाजगतः ।
धैर्यविनामा नवतां प्रययुरनुशयाः प्रिया विना मानवताम् ॥१६॥

शां० । आन० **जनः** लोकः **समाजगतः** गोष्ठीप्राप्तः । **मधु** मद्यं **पपौ** धयति स्म । तस्मात् **आनन्दसमात्** हर्षतुल्यात् **जगतः** भुवनस्य । **ज्योत्स्ना** चन्द्रकान्तिः **इति** हेतोः । तथा **मानवतां** साहंकाराणाम् । **अनुशयाः पश्चात्तापाः नवतां**[2] **प्रययुः** प्रगताः । कीदृशाः ? **धैर्यविनामाः**[3] धीरतानाशकाः । कथं **विना** अन्तरेण । काः **प्रियाः** वल्लभाः ॥१६॥

पु० । **जनः मधु** मद्यं **पपौ** पीतवान् । कीदृशः ? **समाजगतः** गोष्ठीप्राप्तः । हेतुम् आह । **ज्योत्स्ना** चन्द्रिका जगतः सर्वस्य अपि **आनन्दसमा** सुखेन तुल्या इति । किञ्च, **मानवतां** मानिनां **अनुशयाः** पश्चात्तापाः **नवतां** नूतनत्वं **प्रययुः** प्राप्नुयुः । कीदृशाः ? धैर्यं विनमयन्ति न्यक् कुर्वन्ति **धैर्यविनामाः** धृतिनाशकाः इति अन्तर्भाविण्यर्थाद्विनमेः "कर्मण्यण्" [पा. ३. २. १] ॥१६॥

खमपि सतारं जयतां कुमुदैश्चेतोऽम्भसा सता रञ्जयताम् ।
सरसां श्रियं विषहते दाशरथिर्न स्म मनसि मदनविषहते ॥१७॥

शां० । खमपि० **दाशरथी** रामो **न विषहते स्म** न सोढवान् । काम् ? **श्रियं** शोभाम् । केषाम् ? **सरसां** तडागानाम् । किं कुर्वताम् ? **जयतां** अभिभवताम् । किं तत् ? **खमपि** आकाशमपि । कीदृशम् ? **सतारं** तारकायुक्तम् । कैः ? **कुमुदैः** कैरवैः, शोभाधिक्यात् । तथा **रञ्जयतां** हर्षयताम् । किं तत् ? **चेतः** मनः । केन **अम्भसा** जलेन, कीदृशेन ? **सता** शोभनेन । क्व सति न विषहते स्म ? **मनसि** चित्ते सति । कीदृशे ? **मदनविषहते** कामगरलदग्धे ॥१७॥

---

१. **आनन्दसमाजगतः** इति शां० सम्मतः पाठः ॥

२. म० 'सानुवतां' ।

३. म० धीर्यविनाशाः ।

पु० । दाशरथी रामः सरसां शीतलानां श्रियं शोभां मनसि न विषहते स्म न सोढवान् । यतः मदनः एव विषं भ्रममूर्च्छादिकारित्वात् । तेन हतं मनः । कीदृशां सरसाम् ? कुमुदैः सतारं सनक्षत्रं खं व्योम जयतां तिरस्कुर्वतां तथा सता प्रसन्नेन अम्भसा चेतः रञ्जयतां सरागं कुर्वताम् इति । विषहते इति स्मयोगात् अत्र अन्ते लट् "परिनिविभ्यः"[1] इति षत्वम् ।

स स्थिरकान्तारागश्चित्तप्रतिकूलफुल्लकान्तारागः ।

शरदं चतुरस्रां तां विलोक्य वाचं जगाद चतुरः श्रान्ताम् ॥१८॥

शां० । स स्थि० स रामः तां पूर्ववर्णितां शरदं विलोक्य दृष्ट्वा वाचं वचनं जगाद उवाच । कीदृशीम् ? श्रान्तां खिन्नां शरदम् । कीदृशम् । चतुरस्रां संपूर्णाम् । कीदृशः रामः ? स्थिरकान्तारागः[2] अचलसीतानुरागः । तथा चित्तप्रतिकूलफुल्लकान्तारागः चित्तस्य मनसः प्रतिकूलाः अप्रियाः फुल्लाः विकसिताः[3] कान्तारागाः अरण्यवृक्षाः यस्य स तथोक्तः । तथा चतुरः दक्षः ॥१८॥

पु० । चतुरः निपुणः सः रामः श्रान्तां खिन्नां वाणीं जगाद । मनसः खिन्नत्वात् वाग् अपि खिन्ना इति उपचर्यते । विशेषणार्थं वाणी इति पदम् । किं कृत्वा ? चतुरस्रां रम्यां तां प्रकृतां शरदं विलोक्य । कीदृशः ? स्थिरः दृढः कान्तारागः सीताविषयः रागः यस्य तथा चित्तप्रतिकूलाः पुष्पिताः कान्तारेषु महावनेषु वृक्षाः । यस्य विरहचित्ते रम्यता अपि प्रतिकूलीभवति इति ॥१८॥

योगं हारसितानां घटा घनानां जहाति हा ! रसितानाम् ।

दूरे या मम चेष्टा तनुरियमपि संध्रियेत याममचेष्टा ॥१९॥

शां० । योगं० हारसितानां मुक्ताकलापधवलानाम् । घनानां मेघानाम् । घटा पङ्क्तिः । योगं सम्बन्धं जहाति त्यजति[4] । केषाम् ? रसितानां गर्जितानाम् । हा खेदे वर्तते । का असौ ? या मम इष्टा वल्लभा सीता अतः किं संध्रियेत संधारयितुं शक्येत । किं ? यामं प्रहरम् अपि अभिव्याप्य । का असौ ? तनुः शरीरम् । कीदृशी ? अचेष्टा निश्चेष्टपरा[5] अचेतना वा तथा इयं प्रत्यक्षा न एव[6] सन्ध्रियेत इत्यर्थः ॥१९॥

१. परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् (पा. ८. ३. ७०) ।

२–२. म० नास्ति ।

३. म० 'विदग्धः' ।

४. क्षा० "त्यजति त्यजति" अस्ति ।

५–५. क्षा० प्रतौ नास्ति ।

६. क्षा० "प्रत्यक्षतयैव" अस्ति ।

पु० । किं जगाद ? इति आह । हारसितानां मुक्ताफलशुभ्राणां घनानां घटा पङ्क्तिः रसितानां योगं गर्जितसंयोगं जहाति । हा इति विषादे । मम या इष्टा प्रिया सा च दूरे यामम् अपि प्रहरमात्रम् अपि न ध्रियेत न जीवेत् यतः कृशा अचेष्टा चेष्टितुम् अपि अक्षमा इति । "धृङ् अनवस्थाने" संभावने लिङ् ॥१९॥

उत्कण्ठमदभ्रमरं जनयति कुमुदं विजृम्भितमदभ्रमरम् ।
मत्ताः शरदा हंसा विषहेत कथं नु मदनशरदाहं सा ॥२०॥

शां० । उत्कण्ठ० सा सीता । कथं नु वितर्के । विषहेत शक्नुयात्, नैव सहते इत्यर्थः । कम् ? मदनशरदाहं कामबाणपीडाम् । यतः कुमुदं कैरवं जनयति करोति । कम् ? उत्कण्ठम् औत्सुक्यम् ? कीदृशम् ? अदभ्रं बृहत्तरम् । कीदृशम् ? कुमुदं [1]विजृम्भितमदभ्रमरम्[1] विजृम्भितमदाः प्रसृतहर्षा मदोत्कटा वा भ्रमराः भृङ्गाः यस्मिन् तद् तथोक्तम् । तथा [2]मत्ताः[2] मदोत्कटाः । के ? हंसाश्चक्राङ्गाः । कया ? शरदा शरत्कालेन । शोकविह्वलः तु रामः लक्ष्मणाग्रे इदं प्रलपति स्म ॥२०॥

पु० । कुमुदं कर्तृ अदभ्रं उत्कण्ठं महतीं उत्कण्ठाम् अरं शीघ्रं जनयति । कीदृक् ? विजृम्भितमदाः प्रवृद्धगर्वा भ्रमराः षट्पदाः यत्र । किं च, हंसाः शरदा हेतुना मत्ताः अतः सा सीता मदनशरदाहं कामबाणकृतं तापं कथं नु विषहेत क्षमेत इति 'उत्कण्ठ'शब्दो घञ्प्रत्ययान्तः पुँल्लिङ्गः । नु शब्दः वितर्के ॥२०॥

मूलं ही नाशानां बन्धूकं कामिनां हि हीनाशानाम् ।
अधरं कान्त्या जयति प्राणान् विरहे स्त्रियं न कां त्याजयति ॥२१॥

शां० । मूलम्० हि व्यक्तम् । बन्धूकं बन्धुजीवकम् । कान्त्या दीप्त्या । अधरम् ओष्ठम् । जयति अभिभवति अनुकरोति वा । कीदृशम् ? मूलं कारणम् । केषाम् ? नाशानाम् । केषाम् ? कामिनां भोगिनाम् । कीदृशाम् । हीनाशानां भ्रष्ट-कान्ताप्राप्तिनाम् । ही खेदे । तथा कां स्त्रियं महिलां विरहे वियोगे प्राणान् जीवितं न त्याजयति मोचयति सर्वमपि मोचयति इत्यर्थ ॥२१॥

पु० । किञ्च बन्धूकं बन्धुपुष्पं कामिनां नाशानां कामुकमरणानां मूलं निदानम् । कीदृशां कामिनाम् ? नष्टा हीना प्रियासंगत्यभिलाषा येषाम् । ही इति खेदे । कथमिति यतः कान्त्या शोभया अधरं जयति अनुकरोति । विरहे कां स्त्रियं प्राणान् न त्याजयति मोचयति अतः प्रियाधरस्मारकत्वात् प्रियाप्राणत्याजकत्वात्

१-१ क्षा० प्रतौ नास्ति ।
२-२ क्षा० प्रतौ नास्ति ।

च बन्धूकम् एव सर्वप्राणिनां सर्वानर्थबीजम् इति कर्मत्वं कथमपि समर्थनीयम् त्याजितैः फलम् उत्खातैः इति[1] अत्र ॥२१॥

कुसुमितबाणासनया शरदा स्मरगर्वकृष्टबाणासनया ।
स्थितशिखिकेकास्वनया न नियुज्यन्ते प्रियासु के कास्वनया ॥२२॥

शां०॥ कुसु० के ? नराः ? **कासु** ? प्रियासु वल्लभासु । न **नियुज्यन्ते** व्यापार्यन्ते अपि तु सर्व एव सर्वासु नियुज्यन्ते इत्यर्थः । कया ? **अनया** प्रत्यक्षतया । **शरदा** शरत्कालेन । कीदृश्या ? **कुसुमितबाणासनया** पुष्पितबीजवृक्षया तथा **स्मरगर्वकृष्टबाणासनया** स्मरेण कामेन गर्वेण दर्पेण कृष्टम् अञ्चितं बाणासनं धनुर्यस्यां सा तथोक्ता तया । तथा **स्थितशिखिकेकास्वनया** उपरतमयूरशब्दया ॥

पु०॥ अनया शरदा **के** पुरुषाः **कासु** प्रियासु न **नियुज्यन्ते** न प्रवर्तन्ते सापराधा अपि गाढमाना हि अपि प्रवर्तन्ते इत्यर्थः । कीदृश्या ? **कुसुमिताः** पुष्पिताः **बाणाः असनाः** च यस्यां, तथा **स्मरेण** गर्वात् कृष्टम् अहंकारेण आकृष्टं **बाणासनं** धनुः यस्यां तथा **स्थितः शिखिकेकास्वनः** मयूरकूजितं यत्र [तादृश्या] । शरदन्ते अपि केकास्वनानुवृत्तिः अस्ति इति विशेषणत्रयं हेतुगर्भम् ॥२२॥

दैन्यं भूरि हसद्भिः सप्तपलाशैः करोति भूरिह सद्भिः ।
शैलकुचाऽपङ्का मे वधाय कर्षति शठे कुचापं कामे ॥२३॥

शां०॥ दैन्य० भूः पृथ्वी । इह शरदि **मे** मम **दैन्यं** दीनतां **करोति** विदधाति । कीदृशम् ? **भूरि** प्रचुरम् । कैः कृत्वा ? **सप्तपलाशैः** सप्तच्छदैः । कीदृशैः **हसद्भिः** विकसद्भिः तथा **सद्भिः** शोभनैः । कीदृशी **भूः** ? **शैलकुचा** गिरिस्तनी, तथा **अपङ्का** अकर्दमा । क सति । **कामे** मदने । किं कुर्वति **कर्षति** । **शठे** दुरात्मनि । **कुचापं** कुत्सितधनुः । किमर्थम् ? **वधाय** घाताय[2] । कस्य ? **मे** मम ॥२३॥

पु०॥ [**भूः**] पृथ्वी इह **सद्भिः** अत्र स्थितैः **हसद्भिः** पुष्यद्भिः **सप्तपलाशैः** सप्तपर्णाढ्यैः वृक्षैः (**मे**) मां **भूरि** बहु **दैन्यं करोति** । कीदृशी भूः ? **शैलकुचा** पर्वतस्तनी तथा अपङ्का निष्कर्दमा । क्व सति ? **शठे** अनिष्टकारिणि कामे **कुचापं** कुत्सितं धनुः मम **वधाय कर्षति** ॥२३॥

दृष्टिविषा दीप्राणां नलिनानां श्रीः कथं विषादी प्राणान् ।
बिभृयां हि सरोगतया[3] कमलिन्या क्षत इवामलसरोगतया[4] ॥२४॥

१. इति अत्र–इतिवाक्यवद् अत्र कर्मत्वं समर्थनीयम् इत्येवम् आशयः प्रतिभाति । २ शा० 'विघाताय' । ३ सरोगतया रोगसहिततया इति एकं पदम् । ४ सरः गतया—सरोगतया इति पदद्वयम् ।

शां०।। दृष्टि० यतो दृष्टिविषा दृष्टिः दर्शनमेव विषं यस्याः सा दृष्टिविषा मारणात्मकत्वात्। का ? श्रीः शोभा। केषाम् ? कमलानां पद्मानाम्। कीदृशानाम् ? दीप्राणां दीपनस्वभावानाम्[1]। अतः कथं विषादी विषण्णः सन् प्राणान् असून्[2] बिभृयाम् धारयेयम् अहम्। हि स्फुटम्। किम् इव अहम् ? क्षतः इव हतः इव। कया सरोगतया दुःखिततया[3] दर्शने दुःखोत्पत्तेः, [4]तथा कमलिन्या च पद्मिन्या [च] क्षत इव। किं विशिष्टया ? अमलसरोगतया निर्मलतडागोत्पन्नया[4] ।।२४।।

पु०।। हि यस्मात्। दीप्राणां भ्राजिष्णूनां कमलानां पद्मानां श्रीः समृद्धिः दृष्टिविषा दर्शनमात्रेण। या व्याली विषं संक्रमयति सा दृष्टिविषा उच्यते। अतः तदारोपः क्रियते। अतः अमलसरोगतया निर्मलसरःप्राप्तया कमलिन्या क्षतः इव हत इव अहं सरोगतया सज्वरतया विषादी शोकाक्रान्तः। कथं प्राणान् बिभृयाम् धारयेयम् ? दीप्राणाम् इति "नमिकम्पि" (पा. ३. २. १६७) इत्यादिना ताच्छील्याद्यर्थे 'र' प्रत्ययः ।।२४।।

त्यजति न दीनान्तोऽयं क्रौञ्चगणो निर्मलं नदीनां तोयम्।
विरुतैरवशं सीते ! कुर्वन् मां काञ्चिदामरवशंसी ते ।।२५।।

शां०।। त्य० हे सीते ! मैथिलि ![5] क्रौञ्चगणः[6] सारससंघातः अयम् प्रत्यक्षः। न त्यजति न मुञ्चति[7]। किं तत् ? नदीनां सरितां तोयं जलम्। कीदृशम् ? निर्मलं विमलम्[8]। कीदृशः अयम् ? दीनान्तः दैन्ययुक्तः विनाशः[9]। किं कुर्वन् ? [कुर्वन्] विदधत् माम् कीदृशं ? अवशं पराधीनम्। किंभूतः ? काञ्चिदामरवशंसी रसनागुणशब्दसूचकः[10]। कस्याः ते तव। कैः कृत्वा ? विरुतैः शब्दितैः ।।२५।।

अयं क्रौञ्चाख्यः पक्षिगणः निर्मलं प्रसन्नं नदीनां तोयं न त्यजति। कीदृशः ? दीनानां विरहिणाम् अन्तः मृत्युभूतः। किं कुर्वन् ? विरुतैर्नादैः माम् अवशं निश्चेष्टं कुर्वन्। हे सीते ! यतः ते काञ्चीदाम्नः काञ्चीगुणस्य रवशंसी सिञ्जितसूचकः सदृशत्वेन स्मृतिहेतुः इति अर्थः। चित्तानीतत्वेन प्रत्यक्षसीतायाः संबोधनम् ।।२५।।

---

१. म० दीप्तस्वभावानाम्।
२. म० नास्ति।
३. क्षा० 'सदुःखतया'।
४-४. क्षा० नास्ति।
५. म० 'हे सीते मैथिलि' नास्ति।
६. म० 'क्रौञ्चपक्षिविशेषाः'।
७. म० "त्यजतिपरिहृ रति"।
८. म० "अकलुषं"।
९. क्षा० 'दीनताविनाशकः'।
१०. क्षा० "रसनाशब्दकथकः"।

पश्य घनस्तनि तेन क्षपितं धृतिहारिणा घनस्तनितेन ।
नयति शुचं द्रोही मां वहन् त्वदास्यरुचम् आशु चन्द्रो ही माम् ॥२६॥

शां०॥ पश्य० । हे घनस्तनि ! नीरन्ध्रकुचे ! सीते ! मां चन्द्रः हिमांशुः । शुचं शोकम् । आशु शीघ्रम् । नयति प्रापयति । ही खेदे । पश्य विलोकय । कीदृशः ? द्रोही घातकः । किं कुर्वन् ? वहन् बिभ्रत् । काम् ? त्वदास्यरुचं भवत्याः[1] मुखशोभाम् । कीदृशं माम्[2] क्षपितं पीडितं कृशीकृतम् । तेन घनस्तनितेन मेघशब्दितेन[3] । किंभूतेन[4] ? धृतिहारिणा असंतोषमुखेन ॥२६॥

पु०॥ घनः कठिनः निरन्तरः स्तनः यस्याः तस्याः संबोधनम् । हे घनस्तनि सीते ! पश्य । वर्षासु अनुभूतेन मेघध्वनिना क्षपितं क्षपणं ग्लपनं कृतं । कीदृशा ? धृतिहारिणा धैर्यनाशकेन । इदानीं द्रोही जिघांसुः च माम् आशु शुचं शोकं नयति । किं कुर्वन् ? इमां त्वदास्यरुचं त्वन्मुखकान्ति वहन् इति शतृप्रत्ययः । ही शब्दः खेदे । क्षपितम् इति भावे क्तः ॥२६॥

शोकसमुद्रे कान्ते ! पतितस्य ममेह रतिसमुद्रेकान्ते ।
शान्तिः का मिश्रितया स्मरेण शरदा सकान्तकामिश्रितया ॥२७॥

शां०॥ शोकस० । हे कान्ते ! सीते । मे मम शान्तिः शमः इह अस्मिन् काले । का ? अपि तु न का अपि । कीदृशस्य ? पतितस्य आगतस्य । क ? शोकसमुद्रे शुगर्णवे शोकार्णवे । कीदृशे ? रतिसमुद्रेकान्ते प्रीत्याधिक(क्य)नाशके । कया कृत्वा ? पतितस्य शरदा शरत्कालेन । कीदृश्या ? मिश्रितया संयुक्तया । केन ? स्मरेण कामेन । तथा सकान्तकामिश्रितया प्रियासहितभोगिजनाश्रितया ॥२७

पु० ॥ हे कान्ते ! इह शोकसमुद्रे पतितस्य मम शरदा का शान्तिः स्वास्थ्यम् ? न का अपि इति । कीदृशे शोकसमुद्रे ? रतिसमुद्रेकस्य प्रीतिप्राचुर्यस्य अन्ते नाशभूते । कीदृशा शरदा ? स्मरेण मिश्रितया मिलितया । तथा सकान्तैः प्रियासहितैः कामिभिः श्रितया सेवितया ॥२७॥

शोभामाश्वसनानां विदृश्यं किं मां स्मरार्हेमाश्वसनानाम् ।
शिखिना सम दहसि तया रहितं चित्तानुकूलसमदहसितया ॥२८॥

---

१. क्षा० 'भवती' ।
२. म० नास्ति ।
३. क्षा० 'मेघगर्जितेन'
४. क्षा 'कीदृशेन' ।

शा०॥ शोभा०। हे **स्मर**! काम! **किम्** किमर्थम्? मां **दहसि**? संतापयसि? कीदृश? **सम**! तुल्य! केन? **शिखिना** अग्निना। किं कृत्वा? **विदर्श्य** प्रकाश्य। काम्? **शोभां** श्रियम्। कथम्? **आशु** शीघ्रम्। केषाम्? **अशनानां** बीजकतरूणाम्। कीदृशम्? **अर्हं** योग्यम्। केषाम्? **आश्वसनानाम्** आश्वासनानाम्[1]। तथा, **तया** सीतया। **रहितं** हीनम्[2]। कीदृश्या? **चित्तानुकूलसमदहसितया** चित्तानुकूलं मनोरञ्जकं समदं सहर्षं हसितं हासो यस्याः सा तया ॥२८॥

पु०॥ इदानीं स्कन्धकद्वयेन स्मरमुपालभते। हे स्मर! **शिखिना सम**! अग्नितुल्य। किमिति माम् **आशु दहसि** तपसि। कि कृत्वा? **असनानां** सर्जकपुष्पाणां **शोभां** प्र(वि)**दर्श्य** प्रकटीकृत्य। कीदृशं माम्? **चित्तानुकूलं** हृदयं **समदं हसितं** च यस्याः **तया** सीतया च **रहितं** अतः च **आश्वसनानां** सान्त्वनानाम् **अर्हं** योग्यम् इति ॥२८॥

यच्छन्तं ज्यानिगदं न सहेतं[3] तव मत्तषट्पदज्यानिगदम्।
किमामुत्कं पयसि स्थित्वा कमलेषुभिस्त्वमुत्कम्पयसि ॥२९॥

शा०॥ यच्छन्०। **न सहे** अहं न मर्षयामि। कम्? **मत्तषट्पदज्यानिगदम्** क्षीबभ्रमरमौर्वीशब्दम्[4]। कस्य! **तव** ते। किं कुर्वन्तम्? **यच्छन्तं** ददतम्। कम्? **ज्यानिगदं** हानिरोगम्। किं किमर्थम्?। **आमुत्कं** उत्कण्ठितम्। हे स्मर! **उत्कम्पयसि** त्रासयसि। कैः **कमलेषुभिः** पद्मबाणैः। किं कृत्वा? **स्थित्वा**। क? **पयसि** जले।

रामः विरहातुरः लक्ष्मणस्य अग्रे एवं उक्तवान्। साम्प्रतं लक्ष्मणेन[5] सोऽभिधीयते स्म ॥२९॥

पु०॥ हे स्मर! तव ते **मत्ताः** ये **षट्पदाः** एव **ज्या** मौर्वी तस्याः **निगदं** ध्वनिं **न सहे** न मृष्यामि। कीदृशम्? **ज्यानिः** जीर्णना(ता) गदः ज्वरश्च समाहारैकत्वम् तदुभयं **यच्छन्तं** ददतम्। किं च **त्वं पयसि** वारिणि **स्थित्वा कमलरूपैः इषुभिः उत्कण्ठं** उन्मनसं मां **किमुत्कम्पयसि**। पुष्पबाणः हि स्मरः। **यच्छन्तम्** इति "दाण् दाने" इत्यस्य "पाघ्राध्मास्थाम्नादाण्" [पा. ७.३,७८] इत्यादिना यच्छादेशः ॥२९॥

---

१. क्षा० 'आश्वासानां।
२. म० दीनम्।
३. अत्र सहेत इत्यस्य तकारो न कमपि अर्थं भजति अतः तकारः अनर्थको बोध्यः।
४. म० "मत्तं क्षीबं भ्रमरमौर्वीशब्दम्।"
५. क्षा० "लक्ष्मणे रसो"

अथ रामः स्मरतान्तैः कनीयसा गद्यते द्विषां स्म रतान्तः ।
वाक्यं समदं तेन प्रविकीर्णशशाङ्ककिरणसमदन्तेन ॥३०॥

शां०॥ अथ राम० । **अथ** अनन्तरम् । केन ? **कनीयसा** लघुतरेण लक्ष्मणेन² **रामः**[3] ज्येष्ठभ्राता **गद्यते स्म** उक्तः । कीदृशः रामः **स्मरतान्तः** कामपीडितः । तथा **द्विषां** शत्रूणां **रतान्तः** सुरतनाशकः । किं तत् गद्यते स्म ? **वाक्यं** वचनम् । कीदृशम् ? समदं सहर्षम् । कीदृशेन **तेन ? प्रविकीर्णशशाङ्ककिरणसमदन्तेन** विक्षिप्तचन्द्रांशुतुल्यदशनेन ॥३०॥

पु०॥ अथ अनन्तरं **रामः तेन कनीयसा** लक्ष्मणेन **वाक्यं समदं** सगर्वं **न्यगद्यत** अभिहितः । कीदृशः [**स्मरतान्तः**] स्मरेण तान्तः श्रान्तः । कीदृशेन ? **अन्तर्मनसि** आगः अपराधं **स्मरता** रावणसुग्रीवाद्यागः इति अर्थात् लभ्यते । तथा **प्रविकीर्णाः** प्रसृताः ये **शशिनः किरणाः** तैः **समाः दन्ताः** यस्य इति । "ब्रुवि पश्यति (पृच्छति)" इत्यत्र अर्थपरत्वात् गदेः अपि द्विकर्मता ॥३०॥

शाम्यत्वश्रु तवेदं दैन्यं ह्यभिभवति मूढमश्रुतवेदम् ।
शोकार्त्तिः का तरतां परापमानार्णवं विसृज कातरताम् ॥३१॥

शां०॥ शाम्य० । **शाम्यतु** उपशमं गच्छतु⁴ । कि तत ? **अश्रु** नेत्रजलम् । कस्य ? **ते** तव । **इदं** प्रत्यक्षम् । **हि** यस्मात् । **मूढं** ⁵मन्दं⁵ जनम् कीदृशम् **अश्रुतवेदं** अनाकर्णितसिद्धान्तम् । **अभिभवति** जयति । किं तत् ? **दैन्यं** विमनस्कता । **का** च **शोकार्त्तिः** शुक्पीडा ? नैव । केषाम् ? **तरतां** प्लवमानानाम् । कम् ? **परापमानार्णवं** शत्रुजनितम् अवज्ञासमुद्रम् अतः **विसृज** मुञ्च **कातरतां** विह्वलताम् ॥३१॥

पु०॥ किं निजगाद इति आह । भो भ्रातः **तव इदम् अश्रु** नेत्रजलं **शाम्यतु** शान्तम् अस्तु । हि यतः **दैन्यं** दीनता **अश्रुतवेदं** अशास्त्रज्ञं **अभिभवति** न तु त्वां श्रुतपारगम् । **कातरतां** भीरुत्वं **विसृज परापमानार्णवं** शत्रुकृताभिभवसागरं **तरतां** लङ्घयतां भवादृशानां **का शोकार्त्तिः** ? न का अपि । शोके

१. स्मरतान्तः अथवा स्म रतान्तः ।
२. म० 'सौमित्रिणा' ।
३. म० प्रतौ नास्ति ।
४. क्षा० 'यातु'
५–५. म० प्रतौ नास्ति ।

अपि इति । श्रुतं शास्त्रं वेत्ति इति श्रुतवेदः । "कर्मणि अण् (पा. ३. २. १)" इति अण् ॥ ३१ ॥

हरणं सहते नार्या[1] द्विषता को मृग्यतां हि सह तेनाऽऽर्या[2] ।
कुरु बुद्धिं सत्वरतां द्रष्टुं वैवस्वतं रिपुः स त्वरताम् ॥३२॥

शां०॥ हर० । हि यस्मात् । कः सहते क्षमते । किं तत् । **हरणं** अपहारम् । केन ? **द्विषता** शत्रुणा । कस्याः ? **नार्याः** स्त्रियः **तेन** कारणेन तेन अरिणा **सह** सार्धम् । **आर्या** सती सीताऽथवा (अर्या) स्वामिनी । **मृग्यतां** गवेष्यताम् । तथा **कुरु** विधेहि । काम् ? **बुद्धिं** मतिम् । कीदृशीम् ? **सत्वरतां** उपष्टम्भसत्काम् । तथा **स** रावणः **रिपुः** अरिः तव **त्वरताम्** उत्सुकः भवतु । किं कर्तुम् ? **द्रष्टुं** अवलोकयितुम् । किं **वैवस्वतं** यमम् । ३२॥

पु०॥ **द्विषता** शत्रुणा **नार्याः** स्त्रियाः **हरणं** कः **सहते** क्षमते । **हि** अतः **तेन** हर्त्रा **सह आर्या** निष्पापा सीता **मृग्यताम्** अन्विष्यताम् । उभौ अपि अन्विष्येताम् इति अर्थः । यद् वा **तेन हि** तेन हेतुना आर्या सीता सा सर्वैः मिलित्वा मृग्यताम् इति । **आर्या** इति **उक्तम्** परिग्राह्यत्वार्थम् । हे राम **बुद्धिं सत्वरतां** अध्यवसायपरां **कुरु** । स रिपुः **वैवस्वतं** यमं **द्रष्टुं त्वरतां** संभ्राम्यतु । त्वद्योगानन्तरमेव शत्रुः म्रियते इति अर्थः ॥ ३२ ॥

सिद्धिं [3]भवदाशानां नैर्मल्यं[4] कथयतीव भवदाशानाम्[3] ।
स्फुटविकसत्कमलाभं जलं च भूयोऽभिमन्यसे कमलाभम्[5] ॥३३॥

शां०॥ **सिद्धिं** । **आशानां** दिशानाम् **भवत्** जायमानम् **नैर्मल्यं** निर्मलत्वम् । **कथयतीव आख्यातीव** । काम् ? **सिद्धिं** कार्यनिष्पत्तिम् । कासाम् ? **भवदाशानाम्** त्वन्मनोरथानाम् । तथा **जलं** वारि **च कथयति** इव । कीदृशम् ? **स्फुटविकसत्कमलाभं** स्फुटा व्यक्ता विकसत्कमलानां पुष्प्यत्पद्मानां आभा कान्तिः यत्र सः तथोक्तम् । अतः **भूयः** पुनः बाहुल्येन वा । **कमलाभं** परम् **अभिमन्यसे** जानासि त्वम् ? सर्वं एव लाभ इत्यर्थः ॥३३॥

पु०॥ समयः अपि अयं उद्योगयोग्यः इत्यर्थः । **आशानां** दिशां **नैर्मल्यं** वैमल्यं भवत् जायमानं **भवदाशानां** त्वन्मनोरथानां **सिद्धिं कथयति इव** । कीदृशम् ? **स्फुटा**

---

१. सहते नार्याः ।
२. सह तेन आर्या अथवा अर्या ।
३. भवत् आशानाम् अथवा भवदाशानाम्
४. क्षा प्रतौ "वैमल्यम्" पाठः स्वीकृतः
५. कमलाभम् अथवा कम् अलाभम् ।

स्पष्टा **विकसतां कमलानां** पद्मानां **आभा** कान्तिः यत्र तत् तथा **कम्** **अलाभं** असिद्धिं **भूयः** पुनरपि वक्तुम् **अभिमन्यते**[1] भवान् इति शेषः । शरदा दिशां नैर्मल्ये जाते कः अपि अलाभः वक्तुं न शक्यते इति अर्थः ॥३३॥

इति विक्रमवदनेन[2] क्रमेण गदताऽभ्रमुक्तशशिवदनेन ।
ज्येष्ठः शुक्क्लेशमितैः[3] प्रमृज्य नेत्रे नितान्तशुक्क्ले शमितः[4] ॥३४॥

शां०॥ इति । अनेन लक्ष्मणेन **ज्येष्ठः** रामः **शमितः** उपशमं नीतः । किं कृत्वा ? **प्रमृज्य** संस्पृश्य । के ? **नेत्रे** नयने । कीदृशे ? **नितान्तशुक्क्ले** अतिशुभ्रे । कीदृशः ज्येष्ठः ? **शुक्क्लेशं** शुचा शोकेन क्लेशः दुःखं शुक्क्लेशः । तं इतः प्राप्तः । किं कुर्वता ? **अनेन गदता** ब्रुवता ! केन ? **क्रमेण** आनुपूर्व्या । कथम् ? **विक्रमवत्** सावष्टम्भम् । तथा **अभ्रमुक्तशशिवदनेन** मेघरहितचन्द्रवदनेन किं गदितं **इति** पूर्वोक्तम् ॥३४॥

पु०॥ इति **विक्रमवत्** विक्रमयुक्तं वदता **अनेन** लक्ष्मणेन **ज्येष्ठः** रामः **शमितः** शान्तिं प्रापितः । किं कृत्वा ? **नेत्रे प्रमृज्य** बाष्पक्लिन्ने नेत्रे अपमृज्य इति अर्थः । कीदृशेन ? **अभ्रमुक्तशशिवदनेन** मेघानावृतचन्द्रतुल्यवक्त्रेण । कीदृशः ज्येष्ठः ? **शुक्क्लेशं** शोकजनितं दुःखम् इतः प्राप्तः । कीदृशे नेत्रे ? **नितान्तशुक्क्ले** धवले ॥३४॥

गच्छत्यवधावन्तं समीक्षमाणः स्वमर्थमवधावन्तम् ।
निकृतः सख्या तनयः कौशल्याया जगाद स ख्यातनयः ॥३५॥

शां०॥ गच्छ० । [5]स रामः **कौशल्यायाः तनयः** पुत्रः[5] **जगाद** उक्तवान् । कीदृशः ? **निकृतः**[6] विप्रलब्धः । केन ? **सख्या** मित्रेण सुग्रीवेण । तथा **ख्यातनयः** प्रसिद्धनीतिः । *किं कुर्वाणः **समीक्षमाणः** अवलोकयत् । कम् ? **स्वमर्थं** स्वकीय-

१. टीकाकारः मूले 'अभिमन्यते' इति पाठं स्वीकरोति ।
२. विक्रमवद् अनेन ।
३. शुक्क्लेशम् इतः ।
४. शु[क्]क्ले शमितः
५-५. म० नास्ति ।
६. म० 'विकृतः' ।

प्रयोजनं कीदृशं **अवधावन्तम्** अपगच्छन्तम् परियातं वा । क सति ? **अवधौ** *मर्यादायां गच्छति सति । कम् ? **अन्तम्** अवसानम् ॥३५॥

इत्थं लक्ष्मणेन शमितः । **कौशल्यायाः तनयः** रामः **जगाद** बभाषे । कीदृशम् ? **स्वम् अर्थं** आत्मीयं प्रयोजनम् **अवधावन्तं** अपगच्छन्तं नश्यन्तम् । **समीक्षमाणः** पर्यालोचयन् । क सति ? **अवधौ** सुग्रीवपरिभाषितमर्यादायाम् । **अन्तं** समाप्तिं **गच्छति** सति । सुग्रीवेण वर्षानन्तरम् एव आगम्यते इति हि परिभाषितम् । अतः एव **सख्या** सुग्रीवेण **निकृतः** विप्रकृतः । तथा **ख्यातः** प्रसिद्ध **नयः** नीतिः अस्य इति । युग्मकम् ॥३५॥

कुटजैः साकमलास्या[1] दीनाः[2] शिखिनो मया च सा कमलास्या ।
रमते सम्प्रति पत्या तारा केवलमिहर्तुसंप्रतिपत्त्या ॥३६॥

शां० ॥ **कुट०** । इह अस्मिन् काले । **दीनाः** गतहर्षाः । के ? **शिखिनः** मयूराः । कीदृशाः **अलास्याः** नर्तनरहिताः कैः सह ? **कुटजैः साकम्** । तथा च **मया च** सह **सा** सीता । कीदृशी ? **कमलास्या** पद्ममुखी **दीना** वर्तते इति । वचन[वि]परिणामेन सम्बन्धः[3] । **केवलं** परम् । **संप्रति** अधुना । **पत्या** भर्त्रा सह । **तारा** सुग्रीवभार्या **रमते** क्रीडति नान्या रमते । कया कृत्वा ? **ऋतुसंप्रतिपत्त्या** ऋतोः प्राप्त्या अविपरीतप्रवृत्त्या[4] वा ॥३६॥

पु०॥ किं जगाद इति आह । **शिखिनः** मयूराः **कुटजैः साकं दीनाः** शोच्याः जाताः यतः **अलास्याः** लीलानृत्यशून्याः । **कमलास्या** पद्ममुखी सीता **च मया** सह **दीना** । **सम्प्रति** इदानीम् **तारा** [5]**केवलं** सुग्रीवजाया एव **पत्या** सुग्रीवेण सह **ऋतुसंप्रतिपत्त्या** शरत्संमत्या **रमते** क्रीडति इति ॥३६॥

दुष्करमधुना मत्तः श्रियमधिगम्योपभोगमधुना मत्तः ।
रोगमिमं श्वासमयं नावैति गतं च वानरश्वा समयम् ॥३७॥

शां०॥ **दुष्क०**। **वानरश्वा** प्लवगकुक्कुरो **नावैति** नावगच्छति । किम् ? **रोगमिमं दुष्करमिमं**[5] उपभोगलक्षणम् कथंभूतम् ? **श्वासमयं** श्वासहेतुकम् । तथा **दुष्करं**

- म० नास्ति ।

१. साकम् अलास्या अथवा सा कमलास्या

२. चित्रकाव्यत्वेन विद्यमानोऽपि विसर्गो न गण्यते ।

३. 'दीनाः' एवं शिखिनो इत्यस्य विशेषणम् अतः दीना इति बहुवचनम् । यदा च दीना इत्येव सीताविशेषणं क्रियते तदा एकवचनम् वचनविपरिणामेन सम्बन्धः ।

४. म० 'विपरीतवत्या' ।

५. क्षा० प्रतौ नास्ति ।

दुःसहम्। तथा **समयं** कालं वा अवधिकृतम्। कीदृशम्? **गतम्** अतिक्रान्तम्। **न अवैति**। कथंभूतो **वानरश्वा**? मत्तः प्रमादी। केन[1]? **उपभोगमधुना** विषयानुभवनमधेन। किं कृत्वा? **अधिगम्य** प्राप्य। काम्? **श्रियं** लक्ष्मीम्। कस्मात्? **मत्तः** मत्सकाशात्। क्व? **अधुना** इदानीमेव ॥३७॥

पु०॥ किं च **अयं वानरश्वा** कपिकुक्कुरः इमं प्रत्यक्षम् अपि वर्तमानः **श्वासमयं** विश्वासप्रचुरं रोगं **न अवैति** न जानाति समयं वर्षारात्रं च गतम् अतीतं नावैति। **अधुना** साम्प्रतं दुष्करं यथा स्यात् **श्रियं** राजलक्ष्मीं **मत्तः** मत्सकाशात् **अधिगम्य** प्राप्य **उपभोगमधुना** सम्भोगरूपेण मधेन **मत्तः** हृष्टः इति अज्ञानहेतुः। मत्तः हि किञ्चिद् अपि न चिन्तयते। वानरश्वा इति "कुत्सितानि कुत्सनैः" [पा. २, १. ५३] इति समासः ॥३७॥

विसृजन्नहमश्रु तया प्रियया रहितः क्व तिष्ठतीत्यश्रुतया।
नलिनमवश्यायेन प्लुतमिव सीदामि तनुरवश्या येन ॥३८॥

शां०। विसृ० येन कारणेन "**तनुः**" शरीरं **अवश्या** अस्वस्था[2] मम तेन कारणेन **सीदामि** विषण्णः अस्मि शीर्णवान्। कम् इव? **नलिनमिव** पद्मवत्। कीदृशम्[3]? **प्लुतं** व्याप्तम्। केन? **अवश्यायेन**। किं कुर्वन् अहम्? **विसृजन्** मुञ्चन्। किं तद्? **अश्रु** नेत्रवारि। कथंभूतः अहम्? रहितः हीनः। कया? **तया प्रियया** सीतया। कीदृश्या? **अश्रुतया** अनाकर्णितया। कथम्? **क्व तिष्ठति इति** कस्मिन् देशे आस्ते इति ॥३८॥

पु०। किं वा **अहं तया** प्रियया सीतया **रहितः अश्रु** बाष्पं **विमुञ्चन् सीदामि** अथ येन अवसादेन तनुः गात्रम् अपि अवश्या अनायत्ता। किम् इव **अवश्यायेन** हिमेन **प्लुतं** नलिनम् इव। कीदृश्या? **प्रियया**। **क्व तिष्ठति इति** अश्रुतया अनाकर्णितया अश्रुतवार्तया। नलिनम् इति उपमायां लिङ्गभेदः न दूषणम्। आविष्टलिङ्गत्वात्। यथा विद्या धनमिव अर्जिता इति। अवश्या इति वशं न गता **अवश्या** वशं गत इति यत्प्रत्ययेन समासः ॥३८॥

---

१. म० 'केनेति'।
२. म० 'अवस्था
३. म० प्रतौ नास्ति।

युवतिसमायोगेऽहं रत इति न जहाति यः समायो गेहम्[१] ॥२॥
बाणस्य मदस्तस्य स्पर्शेन विनाशमेष्यति मदस्तस्य ॥३९॥

शां० ॥ युव० । तस्य सुग्रीवस्य मदः अपि विनाशम् एष्यति गमिष्यति । केन ! स्पर्शेन स्पर्शेन । कस्य ? बाणस्य शरस्य । कीदृशस्य ? [२]मदस्तस्य[३] मया-क्षिप्तस्य । यो न जहाति न मुञ्चति । किं तत् ? गेहम् ! गृहम् । कीदृशः ? समा-यः । वचनरतः [४]वचनभनः[ग्नः][४] । कथं युवतिसमायोगे स्त्रीसंपर्के अहम् [५]रतः[५] आसक्तः इति हेतोः ॥३९॥

पु० । यस्य सुग्रीवस्य मदः दर्पः मदस्तस्य मया अस्तस्य क्षिप्तस्य बाणस्य स्पर्शेन विनाशं भ्रंशम् एष्यति प्रणश्यति तस्य । कस्य ? यः सुग्रीवः समायो मायावी गेहं गृहं न जहाति । कुतः युवतीनां समायोगे संगमे रतः अहमिति ॥३९॥

परुषं वद सौमित्रे भावं न करोति साधुवदसौ मित्रे[६] ।
व्रज मतिमन्नवधौ तं स्खलितं शरदाभिवीक्ष्य खं नवधौतम् ॥४०॥

शां० । व्रज० । हे सौमित्रे ! लक्ष्मण ! कीदृशः ? मतिमान्[७] बुद्धियुक्तः । व्रज गच्छ । किं करोमि ? वद ब्रूहि । कथं परुषं निष्ठुरम् । कम् ? तं सुग्रीवम् । कीदृशम् ? स्खलितम् च्युतम् । क ? अवधौ मर्यादायाम् [८]विषये[८] । किं कृत्वा ? अभिवीक्ष्य अवलोक्य । किं तत् ? खम् आकाशं नवधौतं प्रत्यग्रनिर्मलम् । कया कृत्वा ? शरदा शरत्कालेन । यतः असौ सुग्रीवः भावं चित्ताभिप्रायं न[९] करोति । कस्मिन् ? मित्रे मयि । कः इव ? साधुवत्[१०] शिष्टः [११]इव[११] ॥४०॥

पु० । यत एवं तस्मात् हे मतिमन् ! सुबुद्धे ! सौमित्रे ! लक्ष्मण ! व्रज गच्छ गत्वा च तं सुग्रीवं परुषं वद निष्ठुरं ब्रूहि । यतः सः [असौ] सुग्रीवः मित्रे सुहृदि मयि साधु-

१. समायोगे अहम् अथवा समायो गेहम् ।
२. म० नास्ति ।
३. म० समयो वंचनपरः ।
४. क्षा० नास्ति ।
५. क्षा० नास्ति ।
६. वद सौमित्रे अथवा साधुवद् असौ मित्रे ।
७. क्षा० 'मतिमत'
८. क्षा० नास्ति ।
९. क्षा० ''चत्तं' ।
१०. म० 'साधु इव' ।
११. म० नास्ति ।

भावं साध्वर्हमभिप्रायं **न करोति** । कीदृशम् ? **तम् अवधौ स्खलितं** परिभाषित-मर्यादायाः स्खलितम् अपराद्धम् । किं कृत्वा ? **खम्** अकाशं **नवधौतं** सद्योर्निर्मली-कृतम् अभिवीक्ष्य दृष्ट्वा अपि । **साधुवदिति** तदर्हति[1] [पा.५.१.११७] इति वतिः ॥४०॥

नित्यसुखिन् नाशं सा वृष्टिर्याता वयं सुखिन्नाऽऽशंसाः।
चन्द्रमपश्याम ! त्वं नावैषि गताश्च कथमापः श्यामत्वम् ॥४१॥

शां० । **नित्य०** ॥ **हे नित्यसुखिन् !** सदा सुखात्मक ! वृष्टिः वर्षा **नाशम्** अभावं **याता** प्राप्ता । **वयं चन्द्र** शशिनं **अपश्याम** दृष्टवन्तः । कीदृशाः सन्तः ? **सुखिन्नाशंसा** अतीवगतमनोरथाः । **त्वं** च **कथं न अवैषि** न जानासि । काः **आपः** पानीयानि । कथंभूताः ? **गताः** प्राप्ताः । किं तत् ? **श्यामत्वं** श्यामल-ताम् ॥४१॥

पु० । किं च हे **नित्यसुखिन् !** अभीक्ष्णं सुखिन् ! वृष्टिः **नाशं याता** गता । वयं च सुखिन्ना **आशंसा** येषां ते **चन्द्रम् अपश्याम** दृष्टवन्तः त्वं **अपश्याम** अपगतकामनि(लिमन् !) दुर्दिनसमयं कथं ना[वैषि] ...॥४१॥

विघने खे दम्भवत कथमेष्यति वा मनोऽद्य खेदं भवतः ।
अविरत ! शरदापि तया प्रियया रमसे मयैकशरदापितया ॥ ४२॥

शां० । **विध०** ॥ **वा** अथवा । **कथम् एष्यति** ? गमिष्यति । **अद्य** अधुना । कम् ? **खेदं** क्लेशम् । किं तत् ? **मनः** चित्तम् । कस्य ? **दम्भवतः** मायाविनः । क्व सति ? **खे** आकाशे । **विघने** घनरहिते । हे **अविरत !** अनुप-शान्त ! सुग्रीव ! यतो **रमसे** क्रीडसे । कया ? **प्रियया** ? भार्यया **तया** तारया । कया कृत्वा ? **शरदा अपि** न केवलं प्रावृषा । कीदृश्या प्रियया ? **मया एक-शरदापितया** एकबाणसमर्पितया ? मैदेकशरदापितया[2] ॥४२॥

पु०। किं कृत्वा परुषं वक्तव्यम् इति चेत् तद् आह । हे सुग्रीव ! **खे [विघने]** व्यभ्रे निर्मेघे । गतायामपि प्रावृषि **दम्भवतः** मायाविनः **भवतः** तव **मनः** कथं **खेदं** श्रान्तिम् **एष्यति** । दाम्भिकत्वात् तव मनो न खेत्स्यते इत्यर्थः । अपि च तया तारानाम्न्या **प्रियया** सह **रमसे** । सा कीदृशी ? या रतेन संभोगेन रहिता विरता न विरता **अविरता** शरदि(द्) यस्याः तया रतव्यापारेण एव नीयमानशरदा इत्यर्थः । तथा **मया एव एकेन शरेण दापितया** साधितया ॥४२॥

१. "तदर्हम्" [पा. ५. १. ११७]

२. म० नास्ति ।

विवृणोत्यवतंसमयं कालश्चन्द्रापदेशमवतं समयम् ।
मागास्त्वं पतितनयस्तं: देशं यं जगाम सुरपतितनयः ॥ ॥४३॥

शां० । विवृ० । **विवृणोति** प्रकाशयति । कः असौ ? **अयं कालः** शरत्कालः कम् ? **अवतंसं** शेखरम्[1] । कीदृशम् ? **चन्द्रापदेशं**[2] शशिछद्मानम्[3] । अतः **अव तं** रक्ष तम् **समयं** तमवधिम्[4] । सुग्रीव **मा गाः** मा गच्छ त्वम् । कीदृशः **पतितनयः** गतनीतिः । कम् ? **तं देशं यं जगाम** गतवान् । कः असौ **सुरपतितनयः** इन्द्रसूनुः वालिः इत्यर्थः । ४३ ॥

पु० । अयं कालः शरद्रूपः **चन्द्रापदेशं** चन्द्रव्याजं **अवतंसं** शेखरं **विवृणोति** । अतः **तं समयं** मया सह कृतां संविदम् अव । अरक्षणे दण्डमाह । **सुरपतितनयः** इन्द्रपुत्रः वाली **यं देशं जगाम तम् मा गाः** परलोपः(कं) मा गमः । संविल्लङ्घने त्वमपि घातिष्यसे इत्यर्थः । यतः **पतितः नयः** नीतिः संवित्पालनं यस्य ॥ ४२ ॥

वाक्यं मानवदेवं निगदन्तं लक्ष्मणोऽथ मानवदेवम् ।
ऊचे वासवसत्त्वं स्वस्थ इहैको गुणाधिवास वस त्वम् ॥ ॥४४॥

शां० । वाक्य० । अथ अनन्तरम् । **लक्ष्मणो मानवदेवं राममूचे** उक्तवान् । किं कुर्वन्तम् ? इदं **निगदन्तं** ब्रुवन्तम् । किं तत् ? **वाक्यं** स्ववचनम् । कीदृशं **मानवत्** साहंकारम् । कथम् ? **एवम्** उक्तप्रकारेण । कीदृशम् ? **मानवदेवं वासवसत्त्वं** इन्द्रसमसत्त्वम्[5] किं ऊचे ? हे **गुणाधिवास !** शौर्यादिगुणनिवास[6] ! [7]**वस त्वं** तिष्ठ त्वं कीदृशः ? **स्वस्थः** निरुद्विग्नः इह गिरौ । कीदृश एव ? **एकः** अद्वितीयः[7] ॥४४॥

पु० । अथ अनन्तरं **लक्ष्मणः मानवदेवं** मनुष्यदेवं **रामम् ऊचे** बभाषे । कीदृशम् ? **एवमुक्तरीत्या मानवत्** चित्तसमुन्नतियुक्तं प्रामाणिकं वा **वाक्यं निगदन्तं** तथा **वासवसत्त्वं** इन्द्रसमसत्त्वं तुल्यसत्त्वं आपदि अविकारसत्त्वम् । किम् ऊचे ? हे **गुणाधिवास !** गाम्भीर्यादिगुणनिलय ! इह **त्वमेकः स्वस्थः** निश्चितः **वस** । अहं सुग्रीवम् उपालब्धुं गमिष्यामि इति अतः आह ॥४४॥

---

१. म० "अवतं संशेखरं"
२. म० "चन्द्रपदेशं"
३. म० "चन्द्रछद्मानं"
४. म० "तामवधिं"
५. म० "इन्द्रसत्त्वं" ॥ ४४ ॥
६. म० "शौर्याद्यद्वितीय" ।
७-७ म० प्रतौ नास्ति. तत्स्थाने म० प्रतौ इह अस्मिन् स्थाने स्वस्थः सन् त्वमेको वसति" अस्ति ।

समये गते घनानां पातितवारीणां योऽप्रतिपत्त्या प्राणान् पाति तवारीणाम्।
न विगणितः शशितिलको यामिन्या येन परुषाणि तमभिधातुं यामि न्यायेन ॥

शां०। सम०। तं सुग्रीवम् । **अभिधातुं** वक्तुम् । कानि ? **परुषाणि** निष्ठुराणि वचनानीति गम्यते । **यामि** अहं गच्छामि । यः **पाति** परिरक्षति कान् **प्राणान्** असून् । केषाम् ? **तव** भवतः अरीणां[1] शत्रूणाम् । कया कृत्वा ? **अप्रतिपत्त्या** अनुद्यमेन कार्यस्य अनारम्भेण वा । तथा **येन** न **गणितः** । कः असौ **शशितिलकः** चन्द्र-विशेषकः । कस्याः ? [2]यामिन्याः रात्रेः । क सति ? **समये** काले **गते** अतिक्रान्ते । केषाम् ? मेघानाम् । कीदृशानाम् **पातितवारीणां** मुक्तजलानाम् । केन अभिधातुम् [2]यामि ? **न्यायेन** नीत्या ॥४५॥

पु०। तं सुग्रीवं **न्यायेन** युक्त्या **परुषाणि अभिधातुं** वक्तुं **यामि** गमिष्यामि । तं कम् ? यः सुग्रीवः **घनानां समये** काले **गते** अपि **अप्रतिपत्त्या** मूढत्वेन **तव अरीणां** राक्षसानां **प्राणान् पाति** रक्षति तन्मारणेनापि(णेऽपि) विलम्बं करोति इत्यर्थः । कीदृशानां **घनानाम्** ? **पातितवारीणां** निर्मुक्तपानीयानाम् किं च येन सुग्रीवेण **यामिन्या शशितिलकः** चन्द्रः एव तिलकः **न गणितः** न विचारितः। प्रवृत्ता शरद् न पर्यालोचिता इति अर्थः ॥४५॥

ताराभरणेऽप्यधुना खेदयिता मत्तो वधमर्हति भवतोऽसौ खे दयितामत्तः ।
क्रियते प्रत्युपकारः कदा शयानेन मिथ्या विलोभितस्त्वं कदाशयानेन ॥४६॥

शां०। तारा०। असौ सुग्रीवः **भवतः** तव **खेदयिता** क्लेशयिता । **मत्तः** मत्सकाशात् **वधं** नाशम**र्हति** । कीदृशः **दयितामत्तः** प्रियागर्वितः[3] । कस्मिन् **खे** आकाशे सति । कीदृशे ? **ताराभरणे** तारकाविभूषणे। **अधुना** अपि न केवलं वर्षाकाले इत्यपि शब्दार्थः । **प्रत्युपकारः**[4] **कदा**[5] कस्मिन् काले **क्रियते** विधीयते । केन ? **शयानेन** अजाग्रता अनुद्यमवता—इत्यर्थः । हे राम **मिथ्या** अलीकम् । त्वं

१. म० "भवारीणां" ।
२–२. क्षा० नास्ति ।
३. क्षा० "प्रियगर्वितः"
४. क्षा० "प्रत्युपकाराश्च"
५. म० 'नास्ति

विलोभितः विप्रतारितः । केन ? **अनेन** सुग्रीवेण । कया कृत्वा ? **कदाशया** कुत्सिताशया[1] शोकवाञ्छया वा ॥४६॥

पु०। किं च असौ सुग्रीवः **मत्तः** मत्सकाशात् **वधमर्हति** । यतः **भवतः खेदयिता** खेदकारी। कथम् ? व्योम्नि **ताराभरणे** नक्षत्रभूषिते **अपि अधुना** शरदि सः **दयितामत्तः** वल्लभाभिहृष्टः । **अनेन** सुग्रीवेण **शयानेन** अलसेन कदा **प्रत्युपकारः** क्रियते । त्वत्कृतोपकारनिष्क्रयः कदाचित् अपि न करिष्यते इत्यर्थः । अतः त्व **कदाशया असौ** प्रत्युपकरिष्यते इति **दुराशया मिथ्या प्रलोभितः** वञ्चितः । क्रियते इति "विभाषा कदाकर्ह्योः" [पा.३.३.५] इति भविष्यति लट् । कदाशया इति "कोः कत्तत्पुरुषेऽचि" [पा.६.३.१०१] नातिकेइति कद्भावः । ४६ ।

न स्मरति किं त्वदीरितशरभासुरतानां अटवीषु योग्रकेसरिशरभासु रतानाम् ।
अथवा अन्तकस्य सृष्टया निशातदन्तस्य प्राप्ता बोधाय शरन्निशा तदन्तस्य ॥

शां०। नस्मर०। किं न **स्मरति** चिन्तयति सुग्रीवः । केषाम् ? **त्वदीरितशरभासुरतानाम्** भवत्क्षिप्तबाणदीप्तिनां कर्मणि षष्ठी । तथा **रतानाम्** आसक्तानाम् । कासु ? **अटवीषु** अरण्येषु । कीदृशीषु ? **उग्रकेसरिशरभासु** भयानकसिंहशरभासु । किं न स्मरति । अथवा यद् वा **प्राप्ता** गता । का असौ ? **शरन्निशा** शरत्कालरात्रिः । किमर्थम् ? **बोधाय** अवगमार्थम् । कस्य ? [**तदन्तस्य**] सुग्रीवविनाशस्य । अत्र अपि कर्मणि षष्ठी । कया ? **सृष्टया** सर्गेण । कस्य ? **अन्तकस्य**[4] यमस्य । कीदृशस्य ? **निशातदन्तस्य**[5] तीक्ष्णदशनस्य[6] ॥४७॥

पु० ॥ किं च त्वदीरितशराणां त्वत्क्षिप्तकाण्डानां या **भासुरता** दीप्तयः ताः सः **न स्मरति** किम् । कीदृशानाम् ? **अटवीषु** ये **उग्राः केसरिणः** सिंहाः **शरभाः** अष्टापदाः **तेषाम्** असुषु **रतानाम्** अनुरक्तानाम् तत्प्राणानाम् इति अर्थः । अथवा किं बहुना उक्तेन ? **निशातदन्तस्य** तीक्ष्णदशनस्य **अन्तकस्य** यमस्य । **बोधाय** सुग्रीवस्य मृत्युं ज्ञापयितुं **शरन्निशा** शरद् एव निशा रात्रिः दिष्ट्या **प्राप्ता**

---

१. क्षा० 'कुत्सितवाञ्छया'
२. म० 'रौद्र' इति पाठः स्वीकृतः ।
३-३. म० नास्ति ।
४. म० नास्ति ।
५. म० "निशितस्य' ।
६. म० 'तीक्ष्णदन्तस्य' ।

दिष्ट्या इति आनन्दे अव्ययम् । बोधाय इति ण्यन्तात् भाववचनत्वे [भाववचनाश्च पा.३-३-११] इति घञ् । "तुमर्थाच्च"[1] इति चतुर्थी[2] ॥४७॥

इत्युक्तवान् विसृष्टो विशेषकान्तेन ज्येष्ठेनारिप्रमदाविशेषकान्तेन ।
रविसुतमभिसर्तुमनाः सन्नागमनं तं हरिरिव हरिमधिशयितं सन्नागमनन्तम् ॥

शां०। इत्यु० । **ज्येष्ठेन** रामेण लक्ष्मणः **विसृष्टः** प्रेषितः । कीदृशः सन् ? **उक्तवान्** । किम् इति पूर्वोक्तम् । कीदृशेन ? **विशेषकान्तेन** अतिशयकमनीयेन । तथा **अरिप्रमदाविशेषकान्तेन** शत्रुसीमन्तिनीतिलकनाशकेन[3] । कीदृशः लक्ष्मणः ? **अभिसर्तुमनाः** गन्तुमनाः[4] । कम् ? **रविसुतं सुग्रीवम्** । कीदृशम् ? **सन्नागमनं** संजातागमनभङ्गं विलम्बितयात्रम् । कः इव **हरिः** इन्द्रः **इव** । **यथा** इन्द्रः **हरिं** विष्णुम् अभिसरति कीदृशं विष्णुम् ? **अधिशयितम्** । कम् ? **सन्नागम्** किमभिधेयम् ?[5] **अनन्तं** शेषम्[6] ॥४८॥

इति श्वेताम्बरश्रीशान्तिसूरिविरचितायां शिवभद्रकाव्यवृत्तौ प्रथमः आश्वासकः ॥

पु० ॥ इति **उक्त०** इत्थम् **उक्तवान्** लक्ष्मणः ज्येष्ठेन रामेण **विसृष्टः** प्रस्थापितः । कीदृशेन ? **विशेषकान्तेन** अतिशयरमणीयेन तथा **अरिप्रमदानां** शत्रुस्त्रीणां यः **विशेषकः** तेषाम् **अन्तेन** नाशकेन शत्रुस्त्रीवैधव्यकारिणा इत्यर्थः । कीदृक् लक्ष्मणः ? तं **रविसुतं** सुग्रीवं **अभिसर्तुमनाः** अभिगन्तुम् अभिलाषुकः । कीदृशं तम् ? **सन्नागमनं** विलम्बितम् आगमनं यस्य तम् । **हरिः** विष्णुः फणी **इव** अभिसर्तुं गन्तुं मनः अस्य इति बहुव्रीहिः । तुंकाममनसः अपि (सोऽपि) इति मलोपः ॥४८॥

इति प्रथमः आश्वासः ॥

---

१. तुमर्थाच्च भाववचनात् (पा. २.३.१५)
२. पु० 'सप्तमी' इति पाठः ।
३ क्षा० "शत्रुविलासिनीतिलकनाशेन" ।
४. म० नास्ति ।
५. म० नास्ति ।
६. क्षा० "तमनन्तसंज्ञम्" ।

...e

...Journal is primarily intended to ...te researches in Medieval Indian ...re. Hence emphasis will naturally ... the languages, literature and ...al sources of that period. But it ...lso give sufficient space to other ...es which throw light on Ancient ...n Culture.

...s of Contributions

...ibutions embodying original ...ches; abstracts of theses accepted ...e University; critical editions of the ...lished Sanskrit, Prakrit, ...ramsa, Old Hindi, Old Gujarati ...appreciations and summaries of ...t and medieval important original ... notices of manuscripts and textual ...sms will be published in the ...al.

...um of Articles

...should be written in any one of ...llowing four languages: Sanskrit, ..., Gujarati and English. ...es written in language other than ...sh should be accompanied by a ...ary in English.

...neration

... D. Institute of Indology will pay ...arium to the authors whose ...ibutions are accepted.

...al Subscription

...d	Rs.	20/-
...pe	Sh.	30
...A.	Dollar	5.00

Other Rules

(1) Contributions intended for publication in the Journal should be type-written (with double spacing) or legibly written on one side only of the paper. Copies should be retained by the authors.

(2) It is presumed that contributions forwarded for publication in the Journal are not submitted elsewhere.

(3) The copyright of all the contributions published in the Journal will vest jointly in the L. D. Institute of Indology and the authors.

(4) Ten offprints will be given to the contributors free of charge.

(5) Titles of books and Journals should be indicated by single underline. Sanskrit, Prakrit, Hindi, Gujarati terms occurring in the articles written in English should be underlined. The standard system of transliteration should be followed.

(6) Those who want their wroks to be reviewed in the Journal should send two copies of the same.

All contributions and correspondence may please be addressed to

Director, L. D. Institute of Indology, Ahmedabad-9

OUR LATEST PUBLICATIONS

(1972)

32. **Philosophy of Shri Svaminarayana** by Dr. J. A. Yajnik

34. **अध्यात्मबिन्दुः** — हर्षवर्धनोपाध्यायनिबद्धः स्वोपज्ञवृत्त्या युतः ;
सं० मुनिश्री मित्रानन्दविजयजी — नगीन जी. शाह

35. **न्यायमञ्जरीग्रन्थिभङ्गः** — चक्रधरकृतः, सं० नगीन जी. शाह

36. New Catalogue of Sanskrit and Prakrit
Mss. JESALMER COLLECTION —
Compiled by Munirāja Shri Punyavijayaji

37. Prakrit Proper Names Pt. II
Compiled by Dr. Mohan Lal Mehta
and Dr. K. Rishabh Chandra

38. Karma and Rebirth by Dr. T. G. Kalghatgi

(1973)

41. Collection of Jaina Philosophical Tracts
Ed. Nagin J. Shah

SAMBODHI

19.4.74
12.676

(QUARTERLY)

VOL. 2 OCTOBER 1973 NO. 3

EDITORS

DALSUKH MALVANIA

DR. H. C. BHAYANI

L. D. INSTITUTE OF INDOLOGY AHMEDABAD 9

CONTENTS

Problems of Ethics and Karma Doctrine
as Treated in Bhagavatīsūtra

K. K. Dixit

Iconography of Sixteen Jaina Mahāvidyās as Represented
in the Ceiling of the S'āntinātha Temple at Kumbhāriā

Maruti Nandan Prasad Tiwari

A Recent Study of Indian Kāvya Literature
— Reviewed

N. M. Kansara

Collection of Jaina Philosophical Tracts — Reviewed

E. A. Solomon

प्राचीन उपनिषदों की दार्शनिक चर्चा

कृष्णकुमार दीक्षित

कुवलयमाला-महाकथा की अवान्तरकथाएँ और उनका वर्गीकरण

के. रिषभचन्द्र

कर्पूरमञ्जरी अने स्वामीभक्त सेवकनुं कथाबिम्ब

हसु याज्ञिक

शिवभद्रकृतं शिवभद्रकाव्यम् (टीकाद्वयसमेतम्)

सं. श्रीमती नीलाञ्जना सु. शाह

जम्बूकविकृतं चन्द्रदूतकाव्यम् (वृत्तिसमेतम्)

सं. पंडित हरिशंकर अ. शास्त्री

THE PROBLEMS OF ETHICS AND KARMA DOCTRINE AS TREATED IN THE BHAGAVATĪ SŪTRA

K. K. Dixit

The *Bhagavatī Sūtra* is a collection of miscellaneous dialogues composed at different periods of time by different authors. And what it offers us is a treatment of what these Jaina authors consider to be the theoretical problems of a fundamental importance. As such the text is of extreme value for those seeking to undertake a historical study of the fundamental theoretical positions evolved by the Jaina authors in the course of time. In the following we intend to corroborate this contention of ours through a study of the problems of ethics and Karma-doctrine as treated in the relevant portions of the *Bhagavatī Sūtra.*

It is revealing that a good majority of *Bhagavatī* dialogues concerned with the problems of ethics take up for consideration the question of violence, and the impression is unmistakable that with the authors concerned non-violence constitutes the basic moral virtue. Most noteworthy in this connection is the doctrine of *kriyā.*[1] As here understood *kriyā* stands for an act of violence exhibiting five aspects, viz.

(i) bodily exertion on the part of the agent of violence—called *kāyikī kriyā,*

(ii) employment of the needed implements on the part of this agent called *ādhikaraṇikī kriyā,*

(iii) the feeling of ill-will harboured by this agent against his prospective victim—called *prādveṣikī kriyā,*

(iv) the bodily torture caused to this victim by this agent—called *pāritāpanikī kriyā* and

(v) the killing of this victim at the hands of this agent—called *prāṇātipātikī kriyā.*

The position is almost self-explanatory, but some of its ramifications are rather curious and two deserve special attention :

(1) Thus in view of the common Jaina notion that the particles of earth, water, fire and air, ordinarily considered to be inanimate, are in fact animate beings the doctrine of *kriyā* is only too often applied to the alleged cases of violence practised against such particles. For example, it is once asked as to who is guilty of greater violence—the person who lights

fire or the one who extinguishes it. The answer is based on the consideration that one who lights fire causes the death of the fuel-particles, the spot of earth where fire burns, and the like while preserving the life or fire-particles, whereas one who extinguishes fire does just the opposite. And the understanding is that the former person is guilty of greater violence than the latter.[2]

(2) Similarly, in view of the notion that implements of violence like bow and arrow, ordinarily considered to be inanimate, are in fact animate beings the question is too often asked as to whether and how far these are co-participant in the act of violence in which they happen to be employed. For example, in case a person shoots at an animal an arrow from his bow and thus kills it then the understanding is that this person is guilty of all the above mentioned five types of *kriyā* but his bow and arrow are guilty of all of them minus the last; on the other hand, in case an arrow set on his bow by a person accidentally falls on some animal and thus kills it the arrow is guilty of all the five types of *kriyā* while the person and his bow are guilty of all of them minus the last.[3] [In this connection a bow or an arrow is treated not as one body inhabited by one soul but as a colony of bodies each inhabited by a distinct soul but that is a matter of details whose significance will become apparent in a moment.]

All this throws considerable light on the specific Jaina understanding of the phenomenon of violence. That the particles of earth, water, fire and air are animate beings and hence a possible victim of violence ever remained a distinct and conspicuous Jaina position. But the position that things like bow and arrow are animate beings and hence a possible agent of violence gradually receded into background—so much so that Abhayadeva, the late medieval commentator of *Bhagavatī* finds considerable difficulty in explaining the passages setting forth the position.[4] And yet this latter position too is not a freak appearance within the body of *Bhagavatī*. For it can easily be recognised as what the modern anthropologists call a primitive animist position and the likelihood is most strong that the common Jaina notion that the particles of earth, water, fire and air are animate beings was a refined outcome of the primitive animist notions prevalent among certain circles of Indian populace. Thus instead of straightaway saying as would a primitive animist that a bow or an arrow is an animate being the Jaina authors of *Bhagavatī* would maintain that this bow or this arrow is a colony of ensouled bodies of the form of earth, water, fire or air. Something like this explains why the so common Indian doctrine of four or five *bhūtas* or physical elements was never accepted as such by the Jainas in whose eyes the particles of earth, water, fire and air were not sheer physical entities but ensouled bodies.[5] So what these Jainas in effect

did was to adapt the doctrine of *bhūtas* to the animist ideas that they had inherited from a primitive past. Be that as it may, *Bhagavatī* does contain pieces of genuinely old Jaina speculation on the question of violence, speculation so old that it at times appeared rather enigmatic to the later generations.

Certainly, the oldest Jaina authors had been arguing that acquisitiveness and violence are two basic moral vices which an ideal monk seeks to get rid of through a strict observance of the prescribed monastic code of discipline. In *Bhagavatī* too the dialogues dealing with the problems of monastic conduct either emphasise that an ideal monk seeks to overcome the spirit of acquisitiveness or that he seeks to avoid the occasions for violence.[6] In view of what was already been said before regarding it nothing requires to be added so far as the question of violence is concerned. Then there remain to be noted only the passages where it is laid down that an ideal monk strictly observes the monastic rules that have been prescribed in connection with the procurement of his daily requirements and the impression is unmistakable that it is thus that the monk conducts his fight against the spirit of acquisitiveness; at one place we are told so in so many words. Even so, the fight against the spirit of violence is deemed to be the major fight. This becomes evident even from the words usually employed to denote an ideal monk (they all tend to connote one up against violence); to take the major important examples, such words are *saṁvṛta*, *saṁyata*, *virata*, *pratyākhyānin*. Of course, the words in question also tend to imply that the person denoted by them is free from all moral vices and the tendency is deliberate. For it was the crux of the old Jaina argument that violence is the spring of all moral vices so that one who is free from violence is free from all moral vices. At one place *Bhagavatī* even says it in so many words that one who follows the prescribed monastic code of conducts, one who moves about cautiously (i.e. is vigilant against the occasions for violence) is free from anger, pride, deceit, and greed—the four basic vices designated '*kaṣāya*' by the latter theoreticians.[7] But the point is that *Bhagavatī* does not deem it necessary to augment the list of basic vices by adding items other than violence (and acquisitiveness). Hence it is that one or two dialogues where note is taken of what the later Jainas call *mūlavratas* or basic vows must be of a relatively late origin.[8] As a matter of fact there is something intriguing about the *Bhagavatī* treatment of these basic vows. As has been just noted, these are the subject proper of no more than one or two rather later dialogues. But there is a list of 18 moral vices which makes its appearance[9] – mechanically so to say – in all sorts of contexts. This list includes the five contraries of the basic vows, the *kaṣāyas* and the following nine vices

(which, however, have played no significant role in the subsequent development of the Jaina ethical discussion) :

preyas = attachment
dveṣa = aversion
kalaha = quarrel
abhyākhyāna = calumny
paiśunya = meanness
parapaivāda = slander
rati-arati = love-hate
māyā-moṣa = deception
mithyā-darśana = false faith

What is still more anomalous is that this list of 18 vices is the standard such list in *Prajñāpanā* though in no text of classical Jainism (certainly not in Umāsvāti's *Tattvārtha*). It seems that it was only later on that the Jaina authors started to attach a special value not only to the list of four *kaṣāyas*, but also to that of five basic vows. The idea is somewhat disturbing but seems to be well based. Perhaps *Ācārāṅga*-II.3 is the first Jaina taxt to have taken up a detailed treatment of the five basic vows along with the five accessories each (called *bhāvanā*) superadded to them. And to add 'renunciation of nightly eating' as a sixth item in this list, as is done in *Daśavaikālika* 4, was a still later phenomenon; (in all probability the passage concerned was a later interpolation in *Daśavaikālika* it being a solitary prose passage in a text otherwise composed in verse). Be that as it may, the *Bhagavatī* passages dealing with ethical problems raise to the status of a basic vice nothing except violence (and acquisitiveness)—this again being an evidence of the relatively early origin of these passages.

Another evidence of the relatively early origin of the *Bhagavatī* passages dealing with ethical problems is the relative absence in them of a treatment of the householder's duties ; (in the oldest Jaina texts such treatment is conspicious by its absence.) Thus only in a few passages is the question raised as to what merit accrues to a householder who feeds a monk well and what demerit to one who feeds him ill.[10] About two passages speak of a householder performing *sāmāyika*, one speaks of the *pratyākhyāna* (meaning 'renunciation of violence') on his part.[11] All these passages must be relatively late and the latest must be one which speaks of what the later authors call the 'twelve vows of a householder'. These twelve vows include those 'five basic vows' as observed on a gross level and seven others called 'additional vows', but the anomaly about this passage is that even in the case of a monk's vows it speaks of 'five basic vows'—as observed on a full-fledged

level—and ten 'additional vows'.[12] These 'ten additional vows of a monk' do not occur in the classical Jaina authors' treatment of the problem (certainly not in Umāsvāti's treatment of it). This perhaps suggests that the passage, though late, is not too much so.

शां०॥ हन्मि०। तेन अपि लक्ष्मणेन अपि सरोषं सकोपं मनः कृतं विहितम् । कीदृशेन ? अभियातेन प्राप्तेन कलहाय तथा स्वामिना । तथा अभिया भयरहितेन । कथं सरोषं मनः कृतम् ? हन्मि मारयामि कान् ? एतान् कपीन् किं कुर्वाणान् ? अपि प्लवमानान् अपि गच्छतः । कम् ? विहायसं खम् । अपिशब्दात् भुवि स्थितान् । तथा समेतान्[2] युक्तान् किं कृत्वा ? विहाय त्यक्त्वा दयां करुणामिति अनेन प्रकारेण ॥ ७३॥

पु०॥ त्रिभिः कुलकम् (विशेषकम्) । तेन लक्ष्मणेन अपि इति मनः कृतम् । किम् इति एतान् कपीन् समेतान् संभूय आगतान् हन्मि मारयिष्यामि कीदृशान्।

१. म० संग्रामसर्वप्रेरितैः ।
२. म० नास्ति ।

विहायसम् व्योम् आकाशं प्लवमानान् अपि। किं कृत्वा ? दयां विहाय करुणां त्यक्त्वा कीदृशेन तेन अभिया निर्भयेन तथा प्रभुणा समर्थेन तथा सरोषं यथा स्यात् एवम् अभियातेन तान् लक्षीकृत्य गतेन । सरोषम् इति मनोविशेषणं च ॥७३॥

अथ सैन्यमभिनदन्तः प्रविश्य कपयोऽपास्य तमभिनदन्तः ।
नेशुः सह मानेन क्षिप्ता न पदं परस्य सहमानेन ॥७४॥

शां०॥ अथ०। अथ अनन्तरम् । लक्ष्मणः अभिनत् भिन्नवान् किं तत् ? सैन्यम् । किं कृत्वा ? प्रविश्य प्रवेशं विधाय । क ? अन्तः मध्ये । कस्य ? सैन्यस्य । न न केवलं अभिनत् । कपयः वानरा अपि नेशुः नष्टाः । किं कुर्वन्तः ? अभिनदन्तः शब्दायमानाः । किं कृत्वा ? अपास्य त्यक्त्वा । कम् ? तं लक्ष्मणम् । कीदृशाः सन्तः ? क्षिप्ताः तिरस्कृताः । कथम् ? सह समम् । केन ? मानेन अहंकारेण अहंकारः अपि क्षिप्तः इत्यर्थः । कथंभूतेन ? न सहमानेन न क्षमता किं तत् पदम् अवस्थानम् । कस्य ? परस्य शत्रोः ॥७४॥

पु०॥ अथ एवं निश्चयानन्तरं लक्ष्मणः अन्तः प्रविश्य सैन्यम् अभिनत् बिभेद । कपयः अपि तम् अपास्य त्यक्त्वा अभिनदन्तः सर्वतः नदन्तः सर्वतः मिलित्वा नेशुः पलायिताः । कीदृशाः ? क्षिप्ताः कोदण्डेन प्रेरिताः । केन ? अर्थात् लक्ष्मणेन एव । कीदृशेन ? मानेन चित्तसमुन्नत्या परस्य शत्रोः पदं व्यवसायम् । न सहमानेन असृष्यमाणेन—पदं व्यवसिति-त्राणम्" इति अमरः [३.३.१००] ॥७४॥

नास्ति पुरी स च रावः क्षणादितीव ब्रुवन् पटुः सचरा वः ।
व्याप निवासवरागं प्रमदानामाक्षिपन्निवाऽऽसवरागम् ॥७५॥

शां०॥ नास्ति०। स च रावः शब्दः व्याप व्यानशे। कीदृशः ? पटुः पाटवोपेतः किं कुर्वन्निव ? ब्रुवन्निव आभाषमाण इव । किम् ? न अस्ति । न विद्यते । कस्मात् ? क्षणात् क्षणमात्रेण । का असौ ? पुरी नगरी किंभूता ? सचरा सजङ्गमा । केषाम् ? वः युष्माकम् । इति एवं प्रकारम् । कं व्याप ? निवासवरागं निवासश्रेष्ठपर्वतम् । किं कुर्वन् ? निवासम् आक्षिपन् इव व्यपनयन् इव । कम् ? आसवरागं मद्यरक्तताम् मद्याभिलाषं वा । कासाम् प्रमदानां तच्छ्रवणेनरूपोत्पन्नः ॥७५॥

१. म० नास्ति ।

१. म० तरुणेन भावेन पत्रैः ।

पु०॥ सः कपीनां रावः निवासभूतं वरागं श्रेष्ठं पर्वतं व्याप व्याप्तवान्। किं कुर्वन् इव ? सचरा सजङ्गमभावा पुरी युष्मन्नगरी क्षणात् न अस्ति न भविष्यति इति ब्रुवन् इव तथा प्रमदानां योषितां आसवरागं मधुमदं आक्षिपन् इव प्रतिषेधयन् इव इति उत्प्रेक्षा। रावः इति घञ् प्रत्ययः चिन्त्यः। ण्यन्तस्य इति कश्चित् ॥७५॥

चेतोभिः स्तननमितैः श्वासचलैश्चोदरैः स्त्रियः स्तननमितैः।
समदैराशु क्लान्तैर्नेत्रैश्च भयं शशंसुराशुक्लान्तैः ॥७६॥

शा०॥ चेतो०। आशु शीघ्रम्[2] स्त्रियः वनिताः भयं भीतिं शशंसुः कथितवत्यः। कैः चेतोभिः मानसैः। कीदृशैः इतैः। किम् ? स्तननं शब्दं रोदनम्[3]। तथा उदरैः। कीदृशैः ? श्वासचलैः निश्वासचञ्चलैः। तथा स्तननमितैः कुचनम्रैः। तथा नेत्रैः नयनैः। कीदृशैः ? समदैः मत्ततायुक्तैः सम‍न्मथैः वा। तथा आशुक्लान्तैः ईषद्धवलपर्यन्तैः। तथा क्लान्तैः खिन्नैः ग्लानैः ॥७६॥

पु०॥ स्त्रियः भयं भीतिं शशंसुः सूचयामासुः। कैः कैः ? चेतोभिः उदरैः नेत्रैः च। कीदृशैः चेतोभिः स्तननमितैः ग्लानिम् इतैः प्राप्तैः अनेकार्थत्वात् धातूनां स्तनिर्ग्लानौ द्रष्टव्यः। कीदृशैः उदरैः ? श्वासचलैः श्वासेन निश्वासेन चलैः कम्पनैः तथा स्तननमितैः स्तनाभ्यां नमितैः प्रह्वीकृतैः। नेत्रैः कीदृशैः ? समदैः पूर्वमदसहितैः। अनन्तरम् आशु शीघ्रं क्लान्तैः श्रान्तैः तथा खिन्नैः। तथा आशुक्लः ईषच्छुभ्रः अन्तः येषां तैः ॥७६॥

पङ्कजदलकान्तेषु प्रवृद्धबाष्पार्द्रविगलदलकान्तेषु।
कासाञ्चित्तत्राऽऽस स्फुटतर इव लोचनेषु [5]चित्तत्रासः ॥७७॥

शा०॥ पङ्क०। चित्तत्रासः मनोभयम् आस बभूव। कीदृशः इव ? स्फुटतरः इव व्यक्ततरः इव। कीदृशेषु ? पङ्कजदलकान्तेषु पद्मपत्रकमनीयेषु तथा प्रवृद्धबाष्पार्द्रविगलदलकान्तेषु वृद्धिगताश्रुतिमितश्रवःकुटिलकेशपर्यन्तेषु ॥७७॥

पु०॥ किं च नागरिकाणां नगरे भवानां निपुणानां स्त्रीणां नयनेषु कज्जलं भ्रष्टं बाष्पोद्गमवशात् अञ्जनं नष्टम् इत्यर्थः। कीदृशेषु ? अपगतं प्रियाऽऽनयनं प्रियाकर्षणं यैः तेषु कटाक्षविक्षेपादिविलासशून्येषु इति अर्थः। तथा

१-२. म० नास्ति

३. क्षा "रोदनंतेवेम्रैतैः"।

४. कासांचित् तत्र आस।

५. चित्तत्रासः

पङ्कजदलकान्तेषु कमलपत्रवत् रमणीयेषु तथा **प्रवृद्धः** यः **बाष्पः** अश्रुजलं तेन **आर्द्राः विगलन्तः अत एव** तज्जला अलकान्ताः येषु [तेषु] नागरिकेति "नगरात् कुत्सन–प्रावीण्ययोः" (पा. ४-२-१२८) इति प्रावीण्ये वुञ् ॥७७॥

हृषितकुचसमुद्गतया रोम्णां राज्या च भीवशसमुद्गतया ।
करमितमध्यासितया शुशुभेऽन्या त्रिवलिभङ्गमध्यासितया ॥७७॥

शां०॥ हृषि०। अन्या अपरा स्त्री । **शुशुभे** बभौ । कया **हृषितकुचसमुद्गतया** रोमाञ्चितस्तनवर्तुलतया[1] । तथा **रोम्णां** राज्या च पङ्क्त्या । कीदृश्या ? **भीवशसमुद्गतया** भयहेतुसमुत्थितया । तथा **आसितया** आ ईषत् शुक्लतया । **असितया** वा कृष्णया । तथा **त्रिवलिभङ्गमध्यासितया** वलित्रयभङ्गमध्यारूढतया । कीदृशी ? अन्या **करमितमध्या** हस्तपरिच्छिन्नमध्यमा ॥७८॥

पु०॥ अन्या काचित् **शुशुभे** रराज । कया ? **हृषितकुचसमुद्गतया** हृषितः रोमाञ्चितः कुचसमुद्गः स्तनमण्डलं यस्याः सा हृषितकुचसमुद्गा तस्याः **भावः** "त्वतलोर्गुणस्य"[2] इति पुंवद्भावः सामान्यविवक्षया नपुंसकाङ्गात् तल प्रत्ययः । न केवलं तया रोम्णां राज्या च कीदृश्या ? **भीवशतः** भयवशात् **समुद्गतया** प्रादुर्भूतया यद् वा **असितया** कृष्णया तथा **त्रिवलिभङ्गं**—वलित्रयविच्छेदम् **अध्यासितया** अधिष्ठितवत्या । कीदृशी स्त्री ? **करमितमध्या** मुष्टिसंमितमध्यभागा इत्यर्थः । त्रिवलिभङ्गमिति "अधिशीङ्स्थासां कर्म" (पा. १. ४. ४६) इति कर्मत्वात् द्वितीया ॥७८॥

अथ रणसाहसदक्षं[3] दयितं मदविभ्रमेण सा[4] हसदक्षम् ।
रहितामलपद्माऽन्या[5] श्रीरिव तारा सबाष्पमलपद् मान्या[6] ॥७९॥

शां० ॥ अथ० ॥ अथ अनन्तरम् । **सा** तारा सुग्रीवभार्या । **दयितं** प्रियं **अलपत्** उक्तवती । कथम् ? **सबाष्पं** साश्रु । कीदृशम् ? **रणसाहसदक्षं** संग्रामादभुतकर्मपटुम् । तथा **हसदक्षं** हसन्ती वा अक्षिणी नेत्रे यस्य स तथोक्तः

१. म० 'रोमाञ्चितस्तनवर्तुलायाः'

२. "त्वतलोर्गुणवचनस्य" Vārttika on ६।३।३५।

३. साहसदक्षम् ।

४. सा हसदक्षम् अथवा सा अहसदक्षम् ।

५. मलपद्माऽन्या ।

६. सबाष्पम् अलपद् मान्या ।

तम् । केन ? **मदविभ्रमेण** मदविलासेन । कीदृशी च ? **अन्या** श्रीः इव अपरा लक्ष्मीः इव । किंभूता श्रीः **रहितामलपद्मा** त्यक्तोज्ज्वलकमला । कीदृशी सा ? **मान्या** पूज्या अग्रमहिषीत्वात् ॥७९॥

पु०॥ अथ पुरा व्याकुला अनन्तरं **सा** प्रसिद्धा **तारानाम्नी** प्रिया सबाष्पं यथा स्यात् एवं **दयितं** प्रियं सुग्रीवम् **अलपत्** अभाषत । कीदृशं **दयितम्** ? **रणसाहसे दक्षं** रणरूपे साहसे दक्षं चतुरम् । भयानपेक्षं कर्म साहसम् । तथा **मदविभ्रमेण** सुरापानजनितमदविलासेन **अहसदक्षं** विकलम् । कीदृशी तारा ? **रहितामलपद्मा** त्यक्तसितकमला **अन्या श्रीः** इव अपरा लक्ष्मीः इव । मान्या मानिनी या **अलपद् मान्या** इति अत्र अनुनासिकाभावे पक्षे जश्त्वमेव ॥७९॥

निधिरिव यो धैर्यस्य क्रियते न प्रार्थनाऽपि याधैर्यस्य ।
सौमित्रिमवध्यन्तं रुषितं नावैषि अमुं च किमवध्यन्तम् ॥८०॥

शां ० ॥ निधि ० ॥ तं **सौमित्रिं** लक्ष्मणम् । **न अवैषि** न जानासि । किंभूतम् ? **रुषितं** कुपितम् । तथा **अवध्यं** अविनाशं(श्यं) तथा **अवध्यन्तं** च मर्यादाऽवसानम् । किं **न अवैषि** । लक्ष्मणो **निधिः इव** निधानमिव । कस्य ? **धैर्यस्य** सत्त्वस्य । तथा यस्य **प्रार्थना अपि** याच्ञा अपि युद्धाय[1] **योधैः** भटैः[2] **न क्रियते** न विधीयते ॥८०॥

पु० ॥ तं **सौमित्रिं** न **अवैषि** न जानासि । कीदृशं तम् ? **अवध्यन्तं** प्राप्तं त्वत्कृतमर्यादान्तेन समागतमित्यर्थः । कीदृशम् ? **उज्झितं** त्वया उपेक्षितमथवा **सौमित्रिं नावैषि** स्वापेक्षितं मर्यादात्वं च **नावैषि** इति योजनीयम् । कीदृशं तम् ? यः **धैर्यस्य** धीरत्वस्य **निधिः** इव । यस्य च **प्रार्थनापि न क्रियते** । प्रार्थना युयुत्सा अभिध्यानं वा । यथावत्प्रार्थनः जातु न वा आजिगतेन इति **प्रार्थना अपि न क्रियते** किम् इति युद्धमिति अपिशब्दार्थः यतः **अवध्यं** हन्तुमशक्यम् इति अर्थः ॥८०॥

वहति न रोमाञ्चेतः कायो मुष्णाति स हि नरो मां चेतः ।
तदरिविनाशैः[3] क्रमते स्थातुं तदनुनयं विना शक्रमते ! ॥८१॥

१. म० 'यज्ञय' अस्ति ।

२. म० नास्ति ।

३. म० किमरिविनाशः पाठः स्वीकृतः ।

शां० वह० ॥ तस्मात् **किं क्रमते** [1]युज्यते। किं ∠कर्तुम् ? **स्थातुम्** ∠आसितुम् । कः असौ ? **अरिविनाशः** शत्रुवधः । कथम् ? **विना** अन्तरेण । किम् ? **तदनुनयं** लक्ष्मणानुग्रहम् । हे **शक्रमते** ! इन्द्रतुल्यमते ! शक्रतुल्यबुद्धे ! सुग्रीवः **हि** यस्मात् **न वहति** न चेष्टतेऽत्र कः7[2] असौ ? **कायः** शरीरम् । कीदृशः ? **रोमाञ्चेतः** रोमोद्गतः । तथा **इतः**[3] अस्मात् स्थानात् **मां मुष्णाति** । अपहरति । कः असौ ? **सः नरः** स लक्ष्मणः ॥८१॥

पु ० ॥ हे **शक्रमते** ! शतमखप्रज्ञ ! इन्द्रतुल्यप्रज्ञ ! **अरिविनाश** ! शत्रुघातक ! **तदनुज्ञया** विना लक्ष्मणस्य अनुज्ञया **विना विनाशः** स्थानं क्रमते । **हि** यस्मात् कारणात् सः **नरः** नरनारायणयोगात यः **मां च इतः मुष्णाति** मदीयं चित्तमपहरति । मुषेः द्विकर्मकत्वात् मामिति कर्मणि द्वितीया । चित्तस्य मुषितत्वात् **कायः** शरीरं चेतः न **वहति** न धारयति । कीदृशः कायः ? **रोमाञ्चेन** भयजपुलकेन **इतः** प्राप्तः । अरीन् विनाशयति इति **अरिविनाशः** कर्मणि अण् । क्रमते इति अप्रतिबन्धने आत्मनेपदम् ॥८१॥

> इत्याप्तसतीव्रतया हितमुक्तः कारणस्य च स तीव्रतया ।
> आस समन्त्रस्तान्तां प्रियां विहाय मधुना समं त्रस्तां ताम्[4] ॥८२॥

शां०॥ **इत्या०** ॥ ∠सुग्रीवः **आस** बभूव । कीदृशः **समन्त्रः** मन्त्रवान् । किंभूतः सन् ?7[5] **उक्तः** भणितः सन् । कया ? **तया** तारया । कीदृश्या ? **आप्तसतीव्रतया** प्राप्तसतीसाध्वीव्रतया । किमुक्तः **हितं** पथ्यम् । किंभूतामिति पूर्वोक्तम् । कया ? हेतुभूतया उक्तः **तीव्रतया** अमन्दत्वेन । कस्य ? **कारणस्य** हेतोः । **चकारः** समुच्चयार्थः किं कृत्वा ? **समन्त्र** आभ[6] **विहाय** त्यक्त्वा । काम् **प्रियां** वल्लभां[7] **तान्तां** खिन्नां तथा **त्रस्तां** भीतां कथम् ? **समं** सह । केन ? **मधुना** मद्येन तां[8] मद्यं च त्यक्त्वा इत्यर्थः ॥८२॥

---

१. म० 'क्रियते' अस्ति ।
२. म० ∠ 7 नास्ति ।
३. म० 'अत' अस्ति ।
४. क्षा० अस्य श्लोकस्य अपरार्धः नास्ति ।
५. क्षा० ∠ 7 नास्ति ।
६. क्षा० 'समंत्रस्तास' अस्ति ।
७. क्षा० नास्ति ।
८. म० नास्ति ।

पु ० ।। स सुग्रीवः समन्त्रः आस सविकारः बभूव । केन हेतुना ? कारणस्य लक्ष्मणागमनरूपस्य । तीव्रतया दुःसहत्वेन । कीदृशः ? पतिः । आप्त-सतीव्रतया प्राप्तपातिव्रत्यतारया हितम् उक्तः भाषितः । किं कृत्वा ? मधुना सुरया समम् । तां प्रियां विहाय सुरां प्रियां च त्यक्त्वा इति अर्थः । कीदृशीम् ? वल्लभां ताम् अतः एव तान्तां ग्लानाम् ॥८२॥

रागे विद्वानरतः[1] तत उपधाशोधितोर्थविद्वानरतः[2] ।
हनुमान् सामात्यं तं हितं परीक्ष्याऽभ्युवाच सामाऽत्यन्तम् ॥८३॥

शां० ।। रागे० ।। हनुमान वानरविशेषः अभ्युवाच[3] उक्तवान् साम सान्त्वं प्रियवचनम् । कीदृशम् ? अत्यन्तं हितम्[4] अतिशयेन हितम् अनुकूलम् । किं कृत्वा ? परीक्ष्य पर्यालोच्य समुवाच । तं सुग्रीवम् । कीदृशम् ? सामात्यं समन्त्रिणम् । कीदृशः हनुमान् विद्वान् पण्डितः । केभ्यः सकाशात् ? ततः वानरतः[5] तेभ्यः वानरेभ्यः तथा अरतः अनासक्तः । क्व ? रागे रागोत्पादकेषु विषयेषु । तथा उपधाशोधितः धर्मार्थकामभयाख्योपधापरीक्षितः । तथा अर्थवित् अर्थशास्त्रज्ञः प्रयोजनवेदी च ॥८३॥

पु ० ।। तस्मिन् इव आयति हनूमान सामात्यं मन्त्रिसहितं सुग्रीव-मभ्युवाच । अभिमुखः बभाषे । किं कृत्वा ? वानरतः सुग्रीवात् साम सान्त्वं अत्यन्तं हितं सुष्टु पथ्यं परीक्ष्य सुग्रीवकर्तृकं लक्ष्मणविषयं सामप्रयोगं हित-त्वेन पर्यालोच्य इति अर्थः कीदृशः हनूमान् ? रागे भोगसाधनविषये अरतः असक्तः विद्वान् ज्ञानी तथा चतुर उपधाशोधितं उपधाचतुष्टयशोधितं अर्थं कार्यतत्वं वेत्ति इति । "उपधा अमात्यपरीक्षाप्रकाराः ताः चतस्रः भवन्ति धर्मार्थ-कामभयानां विषयाणां चतुष्टयात् तत्र धर्मोपधाशुद्धान् धर्मे नियुञ्जीत, अर्थो-पधाशुद्धान् अर्थे, कामोपधाशुद्धान् अन्तःपुरे, भयोपधाशुद्धान् आत्मरक्षणे" इत्यादि दण्डनीतिविद्भ्यः ज्ञेयम् ॥८३॥

---

१. विद्वान् अरतः ।
२. अर्थविद् वानरतः ।
३. म० 'इत्युवाच' ।
४. क्षा० नास्ति ।
५. म० 'वानरौ' अस्ति ।

सदृशो हि स दस्यूनां नीतिमुपेक्षेत यः किल सदस्यूनाम् ।
यो मार्गः सोऽद्य मया वाच्यो बुद्ध्या भवद्विधे सोद्यमया ॥८४॥

शां०॥ स ०॥ हि यस्मात् । सः **दस्यूनां** शत्रूणां चौरगणां वा **सदृशः** तुल्यः । यः किलेयो(लेत्या?)गमस्तवे । न पुरुषः **उपेक्षेत** अवगणयेत् तां चणयोगात्[2] काम ? **नीतिं** नयम् । कीदृशीम् ? **ऊनाम्** असंपूर्णाम् । क्व ? **सदसि** सभायाम् । तस्मात् **यः मार्गः** सः **अद्य** अधुना **मया वाच्यः** भाषणीयः[3] क ? **भवद्विधे** युष्मत्प्रकारे । कया **बुद्ध्या** ? मत्या । कीदृश्या ? **सोद्यमया** उद्यमयुक्तया[4]॥८४॥

पु० । किमुवाच इति आह—यः मन्त्री सपदि (सदसि) सभायां **ऊनां** निन्दितां **नीतिं** अपनीतिं **उपेक्षेत** ज्ञात्वा न ब्रूयात् **स किल** दस्यूनां **सदृशः** हि अनुतुल्यः इत्यर्थः । **किल** इति मन्त्रित्वस्य मिथ्यात्वद्योतनया(नाय) । **हि** इति **प्रसिद्धौ** हे हा इति प्रसिद्धौ हेतौ वा । यस्मात् **एवं** अतः एव **अद्य मया यः मार्गः** पन्थाः **सः** भवद्विधे युष्मादृशे राजनि विषये **सोद्यमया** उद्योगसहितया **बुद्ध्या वाच्यः** वक्तव्यः बुद्धिपूर्वकत्वात् वाच्यः वक्तव्यः इति उक्तम् ॥८४॥

ननु मन्त्रिवाक्यश्रवणेन किं प्रयोजनम् इति आह—

नीतिः का मन्त्रिभ्यः श्रुता न संपादयेत कामं त्रिभ्यः ।
परिदृष्टनयापनया क्रियात्ययवती तु सिध्यति न यापनया ॥८५॥

शां० ॥ नीति० ॥ का ? **नीतिः** नयः न **संपादयेत** अपि तु सर्वा नीतिः संपादयेत[5] पूरयेत । कम् **कामम्** इच्छा[म्] । केभ्यः **त्रिभ्यः** धर्मार्थकामेभ्यः[6] धर्मार्थकामार्थम्[7] कीदृशी ? **श्रुता** आकर्णिता । केभ्यः **मन्त्रिभ्यः** अमात्येभ्यः । **परिदृष्टनयापनया** परिदृष्टः अवलोकितः नयस्य नीतेः अपनयः विनाशः यस्यां सा तथोक्ता **तु** पुनः **क्रिया न सिध्यति** न निष्पद्यते । कीदृशी ? **अत्ययवती** अतिक्रमवती विनाशयुक्ता वा । कया ? **यापनया** कालहरणेन ॥८५॥

पु० ॥ त्रिभ्यः मन्त्रिभ्यः अमात्येभ्यः **श्रुता नीतिः का** वा **काम**मभिलषितं **न संपादयेत्** न कुर्यात् **सर्वमपि** मनोरथं पूरयेत् इत्यर्थः । यतः परिदृष्टौ सर्व-

---

१ म० नास्ति ।
२. क्षा० नास्ति ।
३. क्षा० 'भणनीयः' ।
४. म० 'सोद्यमयोक्ताय' ।
५. शां. म० नास्ति ।
६–७. म० नास्ति ।

ज्ञातौ नयागन्यौ नीतिकुनीती यस्यां सा क्रिया सिध्यति प्रफलं प्रसूयते या **अपनया** अपगतः नयः नीतिः यस्यां सा अतः एव **अत्ययवती** अत्ययः नीतिः सा यस्यां सा तथा सा । तुनफलान्विता एकस्य निर्णेतृत्वाभावात् द्वयोः ऐकमत्ये कार्यनाशस्य अपि संभवे वा विनयः इति उक्तम् ॥८५॥

कुरु साम्ना तमपरुषं निगदन्तमपि प्लवंगमोत्तम परुषम् ।
आदौ साम्ना यस्य क्रिया स वेत्ता नयस्य साम्नायस्य ॥८६॥

शां० ॥ कुरु० ॥ तं लक्ष्मणम् **अपरुषं** अपगतरोषं **कुरु** विधेहि । केन ? **साम्ना** प्रियवचनेन । हे **प्लवंगोत्तम !** वानरप्रधान ! सुग्रीव ! किं कुर्वन्तम् ? **निगदन्तं** ब्रुवन्तम् । कथम् ? **परुषमपि** निष्ठुरमपि यतः स **वेत्ता** स ज्ञाता **नयस्य** नीतेः । कीदृशस्य ? **साम्नायस्य** सुगुरुपारंपर्यस्य सागमस्य वा **यस्य** क्रियोपक्रमः **आदौ** प्राक् **साम्ना** सान्त्वेन भवति ॥८६॥

पु० ॥ कः असौ उपायः ? तम् आह—हे **प्लवगोत्तम !** कपिश्रेष्ठ ! **तं** लक्ष्मणं **साम्ना** प्रियवाक्यादिना **अपरुषं** अपगतकोपं **कुरु** । कीदृशम् ? **परुषं** निष्ठुरम् । **अपि निगदन्तम्** उच्चैः भाषमाणम् । **यस्य** पुरुषस्य **आदौ** प्रथमं **साम्ना** **क्रिया** सामपूर्वं आरम्भः स नयस्य जेता जैत्रः भवति । कीदृशस्य **? साम्नायस्य** आम्नायः वृद्धोपदेशः तद्युक्तस्य इति । "आदौ सामं(म) प्रयुञ्जीत साम्ना सिद्धिः व्यवस्थिता" इति ॥८६॥

दण्डेन एव रिपुः जेतव्यः किं साम्ना इति आह—

रागादपदेशं कः कुर्याद्युद्धस्य नयविदपदेऽशङ्कः ।
सर्वत्र नयो जयति प्रधनं तेन बलवानपि न योजयति ॥८७॥

शां० रागा० ॥ अपदेशं व्याजं छद्म । **कः कुर्यात्** ? न एव कः अपि विदध्यात् । कस्मात् ? **रागात्** अज्ञानात् । कस्य ? **युद्धस्य** संग्रामस्य । किंभूतः ? **नयविद्** नीतिशास्त्रज्ञः क्व ? **अपदे** अस्थाने अकाले वा । तथा **अशङ्कः** निर्भयः । यतः **सर्वत्र** सर्वस्मिन् प्रयोजने **नयः** नीतिः **जयति । तेन** कारणेन **बलवान् अपि** शक्तियुक्तः अपि **प्रधनं** संग्रामं **न योजयति** न करोति ॥८७॥

पु० ॥ नयवित् नीतिज्ञः को वा **अशङ्कः** शङ्कारहितः सन् रामं जिगीषया **अपदेशे** अस्थाने अपि युद्धस्य **आदेशं** नामोक्तिं **कुर्यात् ?** कः अपि न नीतिज्ञः युद्धस्य नाम अपि न गृह्णाति इत्यर्थः । **सर्वत्र** कार्ये **नयः** नीतिः एव **जयति । तेन** हेतुना **बलवानपि** समर्थः अपि **प्रधनं** युद्धं **न योजयति** न करोति इत्यर्थः ।

उक्तं हि—"पुष्पैः अपि न यः अद्धा वरं (योद्धव्यं) किं पुनः निशितैः शरैः" इति । यदा बलवानपि न युध्येत दुर्बलस्य तव का आशङ्का इह ? ॥८७॥

दृष्टा वानरहरिणा के ते स्थास्यन्ति वीरवानर ! हरिणा[1] ।
गुप्तिं कां तव पुर्यां[2] पश्यसि च स नाभिहन्ति कान्तवपुर्याम्[3] ॥८८॥

शां० ॥ दृष्टा० ॥ हे वीर ! चारभट ! के ते वानरहरिणाः मर्कटमृगाः स्थास्यन्ति । कीदृशाः सन्तः दृष्टा अवलोकिताः । वा अथवा । केन ? तेन हरिणा पुरुषसिंहेन लक्ष्मणेन । तथा ते तव पुर्यां नगर्यां गुप्तिं रक्षाम् पश्यसि निरीक्षसे । तां यां स लक्ष्मणः न अभिहन्ति न तिरस्करोति । कीदृशः ? कान्तवपुः कमनीयशरीरः ॥८८॥

पु० ॥ वाशब्दः पक्षव्यावृत्तौ । नरहरिणा पुरुषसिंहेन लक्ष्मणेन दृष्टाः ते तव वानरहरिणाः कपिहरिणा मृगाः स्थास्यन्ति अपि तु न कपिमृगाः स्थास्यन्ति । यथा सिंहेन दृष्टाः हरिणाः सत्वरं पलायन्ते तद्वत् तेन दृष्टाः कपयः अपि इत्यर्थः । तव पुर्यां कां गुप्तिं रक्षां पश्यसि यां गुप्तिं कान्तवपुः मनोहरगात्रः लक्ष्मणः तरसा बलेन कृत्वा अभिहन्ति । तादृशी कापि तव पुरं न अस्ति इत्यर्थः । अपराधे विषये त्रिकोट्योऽपि च स्युः । त्रिसंख्याकाः कोट्यो भवेयुः । संभावनायां लिङ् ॥८८॥

प्रणयैरपराधेयाः सतां भ्रुकुट्योऽपि च स्युरपराधे याः ।
ता हि नवैरस्यन्ते[4] सान्त्वैस्तस्मात्क्षमं न वैरस्यं ते ॥८९॥

शां० ॥ प्रण० ॥ अपि च किंच । हि तस्मात् । नवैः प्रत्यग्रैः । सान्त्वैः सामप्रयोगैः । ताः भ्रुकुट्यः अस्यन्ते निराक्रियन्ते याः सतां सत्पुरुषाणां [5] अपराधे स्युः । कीदृश्यः अपराधेयाः अनारोपणीयाः । कैः प्रणयैः स्नेहैः कृत्वा । तस्मात् न क्षमं न युक्तम् । वैरस्यं वैमुख्यम् कस्य ते तव । येन च रसेन प्रीतिः तेन एव रसेन वर्धनीया न वैरस्यं कार्यम् इत्यर्थः ॥८९॥

पु० ॥ कीदृश्यः सतां साधूनां प्रणयैः प्रार्थनाभिः अपराधेयाः समाधातुमशक्याः ते अपराधाः कोट्योऽपिना नवैः नूतनैः । सान्त्वैः सामप्रयोगैः ।

---

१. वानर ! हरिणा अथवा वा नरहरिणा ।

२. कां तव पुर्याम् ।

३. कान्तवपुर् याम् ।

४. नवैः अस्यन्ते ।

५. म० नास्ति ।

अस्यन्ते क्षिप्यन्ते निराक्रियन्ते । हिशब्दः अवधारणे तौ एव इत्यर्थः तस्मात् हेतोः **तेन वैरस्यं** नैष्ठुर्यं न क्षमं न युक्तम् । पारुष्यं परित्यज्य लक्ष्मणं सान्त्वय इति भावः ॥८९॥

अथ सस्मितमिदमुक्तो नयशोभी तेन
प्लवगेश्वरेण हनुमानयशोभीतेन ।
दिष्ट्या रमसे सामनि परमे वचसां त्वं
सुजनो हि वदति मित्रं परमेव च सान्त्वम् ॥९०॥

शां०॥ अथ०॥ अथ अनन्तरं हनुमान् तेन **प्लवगेश्वरेण** वानरप्रभुणा सुग्रीवेण । कीदृशेन ? **अयशोभीतेन** अकीर्तित्रस्तेन **इदमुक्तः** अपि भणितः । कथम् ? **सस्मितं** सहास्यम्[1] । कीदृशः हनुमान् ? **नयशोभी** नीतिराजितः । किं भणितः ? **दिष्ट्या** पुण्येन **त्वं रमसे** रतिं करोषि । **हि** समञ्जसत्वेन[2] (?) । कीदृशे ? **परमे** प्रधाने । केषाम् ? **वचसां** वाचाम । **हि** यस्मात । **सुजनः** सत्पुरुषः **मित्रं** सखायं **सांत्वमा(म् ?)** **वचसामेव** च **वदति** । क ? सस्यपुष्टिकालोपेतस्य उपकारकस्य नयस्य वा कालोपेतस्य ॥९०॥

पु० ॥ अथ हनूमद्वचनान्तरं **प्लवगेश्वरेण** सुग्रीवेण **हनूमान् सस्मितम् इदं** वक्ष्यमाणम् **उक्तः** । कीदृशः हनूमान् ? **नयेन** नीत्या शोभते तच्छील इति-**नयशोभी** । कीदृशेन **प्लवगेश्वरेण** ? **अयशोभीतेन** अयशसः अकीर्तेः सकाशात् भीतेन त्रस्तेन । किम् उक्तः इति आह-**त्वं दिष्ट्या वचसां परमे** उत्कर्षे **वर्तसे** इति शेषः । **दिष्ट्या** इति हर्षद्योतकः निपातः । तथा **हि स जनः** अपि अत्र सखायं **सान्त्वम् एव** वदति चशब्दः निर्वाहार्थः । यथा गात्रं न खञ्जनम् इति अत्र खलुशब्दः । **नयशोभी** इति "शुभ दीप्तौ" 'सुप्यजातौ णिनिस्ताच्छील्ये' (पा.३.२.७८) इति णिनिः ॥९०॥

सौम्य न हास्यति बुद्धिः सामोदा रामे सौहार्दबद्धमूला सामोदारामे ।
स्यान्मादृशस्य तुष्टिः का लोपे तस्य उपकारस्य नयस्य वा कालोपेतस्य ॥९१॥

शा० **सौम्य**०॥ **हे सौम्य !** हनुमान् । **मे** मम **बुद्धिः** मतिः न **हास्यति** । न भ्रंशं यास्यति । कीदृशी ? **सामोदारा** साम्ना सामप्रयोगेण सामि वोदारार्

---

१. म० 'सहासं' अस्ति ।

२. क्षा० 'स्वादृशमनिमांसत्वे' अस्ति ।

३ म० 'तु सखा यस्य त्वमेव वचसामं च वदति' अस्ति ।

४. म० "साग्निमीयस" अस्ति ।

प्रवरा सामोदारा । तथा **सौहार्दबद्धमूला** सौहार्दमेव मित्रत्वमेवे बद्धं दृढं मूलं यस्याः सा तथा **सामोदा** सहर्षा । कस्मिन् ? **रामे** रामविषये । **का** तुष्टिः संतोषः स्यात् भवेत् नैव भवेत् ? इत्यर्थः । कस्य ? **मादृशस्य** । क सति ? **लोपे** विनाशे सति । कस्य ? **उपकारस्य** उपष्टम्भस्य । कीदृशस्य ? **कालोपेतस्य** समयप्राप्तस्य । च तथा नीतेश्च । कस्य संबन्धिनः ? **तस्य** रामस्य ॥९१॥[२]

नाहं क्षणमपि सैन्ये सन्नेत्रस्येयं[३]
श्रीर्यदि न तस्य वीर्यात्सन्ने त्रस्येयम्[४] ।
यत एति सुहृत्कुपितः स महर्षभयातो
दोलायते मतिरियं समहर्षभयाऽतः ॥९२॥

शां० नाह०॥ यदि तस्य रामस्य । कीदृशस्य ? **सन्नेत्रस्य** शोभनलोचनस्य । **वीर्यात्** प्रतापात् । इयम् एषा **श्रीः** लक्ष्मीः न भवेत् तदा **न अहं त्रस्येयं** त्रासं भजेयम् । कथम् ? **क्षणमपि** मुहूर्तमपि । क सति ? **सैन्ये** कपिसेनायां सन्ने त्रस्ते सति । **यतः** च **एति** यस्मात् आगच्छति । कः असौ ? **सुहृद्** मित्रम् । कीदृशः **सः ? कुपितः** रुष्टः सन् । तथा **महर्षभयातः** महावृषभगमनः **अतः** अस्मात् हेतोः **इयं मतिः** बुद्धिः मम **दोलायते** संशयारूढा भवति न जाने किं करिष्यति इति । कीदृशी ? **समहर्षभया** तुल्यतुष्टित्रासा सुहृदागमनकोपाभ्याम् ॥९२॥

पु०। किं च **अहं** सैन्ये कपिबले **सन्ने** अवसादं प्राप्ते **अपि न त्रस्येयं** न भीतः भवेयम् । **इयं श्रीः** लक्ष्मीः **सन्नेत्रस्य** शोभनलोचनस्य तस्य लक्ष्मणस्य संबन्धिनः **वीर्यात्** सामर्थ्यात् **यदि** न भवेत् शंप्रदा इयं राज्यसमृद्धिः जाता इति भीतिः क्रियते इति भावः **सुहृद्** मित्रभूतः सः लक्ष्मणः **कुपितः** सन् **यतः एति** यस्मात् आगच्छति । अतः मम मतिः वेलां मर्यादां अवलम्बते । कीदृशी मतिः ? **समहर्षभया** समे हर्षभये यस्यां सा तथा । **सुहृद्** आयाति इति हर्षः । **कुपितः** सन् आयाति इति भीतिः । कीदृशः सः ? **महर्षभयातः** महोक्षस्य इव यातं गमनं [यस्य] स तथा । दोलायति इति कण्ड्वादिपाठात् यक् इति शिवभद्रटीका समाप्ता ॥९२॥

---

१. 'मित्रमेव' अस्ति ।
२. अस्य श्लोकस्य पु॰ टीका नास्ति ।
३. सन्नेत्रस्य इयम् ।
४. सन्ने त्रस्येयम् ।

ज्योत्स्नां शुकपरिधाना आशायत्तस्य
जनयन्ति शोकमतुलमाशा यत्तस्य ।
अद्यापि यच्च कपयः समाह्रियन्ते
न स्खलितमुपनेतुमर्हति समा ह्रियं तेन ॥९३॥

शां० ज्यो० ॥ तेन कारणेन च लक्ष्मणो मम ह्रियं[1] लज्जां स्खलितं क्षण-मुपनेतुं ढौकयितुम् अर्हति योग्यः भवति यत् यस्मात् तस्य रामस्य (आशाः दिशः शोकं शुचं दुःखं जनयन्ति । कीदृशम् ? अतुलम् अप्रमाणम् । कीदृशस्य ? तस्य)[2] आशायत्तस्य मनोरथाधीनस्य[3] । कीदृश्यः आशाः ? ज्योत्स्नांशुक-परिधाना चन्द्रकान्तिवस्त्रच्छादनाः । यतः तथा यच्च यस्मात् च अद्य अपि अधुना अपि कपयः वानराः न समाह्रियन्ते न मील्यन्ते ॥९३॥[4]

वीक्ष्य शरन्मुखमुडुपतिविशेषकोपेतं
प्रणयेन वर्तमान विशेषकोपे तम् ।
कृत उपकारः सख्यं न वञ्चनामेति
अस्मद्विधमनुगमयन्नवं च नामेति ॥९४॥

शां० ॥ वीक्ष्य ॥ स लक्ष्मणः न वञ्चनां स्खलनम् एति गच्छति । किं कारयन् ? अनुगमयन् योजयन् । कथम् ? अस्मद्विधं मादृशम्[5] । कम् अनु-गमयन् ? तं रामम् । कथम् ? कृत उपकारः सख्यं न वञ्चनामेति । कृतः विहितः अस्माभिः भवतामुपकारः तारासमर्पणः (?णम्) लक्ष्मण ! तथा सख्यं मित्रत्वं च नवं नूतनं कृतं भवद्भिः सह अस्माभिः । कथं नाम व्यक्त इति अनेन प्रकारेण । कीदृशम् तम् ? वर्तमानं तिष्ठन्तम् क ? विशेषकोपे अधिकक्रोधे ।[6] किं कृत्वा ? वीक्ष्य अवलोक्य । किं तत् ? शरन्मुखं शरत्कालप्रारम्भः । कीदृशम् ? उडुपतिविशेषकोपेतं चन्द्रतिलकयुक्तम् ? केन वीक्ष्य ? प्रणयेन प्रीत्या ॥९४॥[7]

---

१. क्षा० 'मामह्रियं' अस्ति ।
२. म० नास्ति ।
३. म० 'मनोरथाधारस्य' अस्ति ।
४. अस्य श्लोकस्य पु० टीका नास्ति ।
५. क्षा० मां सदृशं अस्ति ।
६. क्षा० नास्ति ।
७. अस्य श्लोकस्य पु० टीका नास्ति ।

शां० ॥ (क्षा० प्रति) इति पूर्णतल्लगच्छसंबन्धिश्वेताम्बरश्रीशान्तिसूरिविरचितायां शिवभद्रकाव्यवृत्तौ द्वितीयः आश्वासकः समाप्तः। समाप्ता इयं शिवभद्राख्यकाव्यवृत्तिः।

वृन्दावनादिकाव्यानां पञ्चानां वृत्तिम् उज्ज्वलां कृत्वा।

अर्जितं मया पुण्यं तेन यान्तु शिवं जनाः।

श्रीः अस्तु। संवत् १६५३ वर्षे कार्तिक सुदि ८ दिनसोमवा[स]रे पण्डित-पुरन्दरपण्डितश्री श्री श्री श्री श्री श्री श्रीकमलविजयशिष्यगणिकीर्तिविजयपठ-नार्थम्। मुहूर्तादेव लिखितं निर्जरार्थे। श्रीजालोरनगरे ॥

शां०॥ (म० प्रति)। श्री पूर्णतल्लगच्छसंबन्धिश्वेताम्बरश्रीशान्तिसूरिविरचितायां शिवभद्रकाव्यवृत्तौ द्वितीयः आश्वासकः समाप्तः। ब। संवत् १९५१ मिति भादरवा वद १० शुभं भवतु। श्रीरस्तु। कल्याणमस्तु।

श्रीः श्रीः श्रीः श्री श्रीः श्रीः ॥

प्रवरा सामोदारा । तथा सौहार्दबद्धमूला सौहार्दमेव मित्रत्वमेवे[1] बद्धं दृढं मूलं यस्याः सा तथा सामोदा सहर्षा । कस्मिन् ? रामे रामविषये । का तुष्टिः संतोषः स्यात् भवेत् नैव भवेत् ? इत्यर्थः । कस्य ? मादृशस्य । क्व सति ? लोपे विनाशे सति । कस्य ? उपकारस्य उपष्टम्भस्य । कीदृशस्य ? कालोपेतस्य समयप्राप्तस्य । च तथा नीतेश्च । कस्य संबन्धिनः ? तस्य रामस्य ॥९१॥[2]

नाहं क्षणमपि सैन्ये सन्नेत्रस्येयं[3]
श्रीर्यदि न तस्य वीर्यात्सन्ने त्रस्येयम्[4] ।
यत एति सुहृत्कुपितः स महर्षभयातो
दोलायते मतिरियं समहर्षभयाऽतः ॥९२॥

शां० नाह०॥ यदि तस्य रामस्य । कीदृशस्य ? सन्नेत्रस्य शोभनलोचनस्य । वीर्यात् प्रतापात् । इयम् एषा श्रीः लक्ष्मीः न भवेत् तदा न अहं त्रस्येयं त्रासं भजेयम् । कथम् ? क्षणमपि मुहूर्तमपि । क्व सति ? सैन्ये कपिसेनायां सन्ने त्रस्ते सति । यतः च एति यस्मात् आगच्छति । कः असौ ? सुहृद् मित्रम् । कीदृशः सः ? कुपितः रुष्टः सन् । तथा महर्षभयातः महावृषभगमनः अतः अस्मात् हेतोः इयं मतिः बुद्धिः मम दोलायते संशयारूढा भवति न जाने किं करिष्यति इति । कीदृशी ? समहर्षभया तुल्यतुष्टित्रासा सुहृदागमनकोपाभ्याम् ॥९२॥

पु०। किं च अहं सैन्ये कपिबले सन्ने अवसादं प्राप्ते अपि न त्रस्येयं न भीतः भवेयम् । इयं श्रीः लक्ष्मीः सन्नेत्रस्य शोभनलोचनस्य तस्य लक्ष्मणस्य संबन्धिनः वीर्यात् सामर्थ्यात् यदि न भवेत् शंप्रदा इयं राज्यसमृद्धिः जाता इति भीतिः क्रियते इति भावः सुहृद् मित्रभूतः सः लक्ष्मणः कुपितः सन् यतः एति यस्मात् आगच्छति । अतः मम मतिः वेलां मर्यादां अवलम्बते । कीदृशी मतिः ? समहर्षभया समे हर्षभये यस्यां सा तथा । सुहृद् आयाति इति हर्षः । कुपितः सन् आयाति इति भीतिः । कीदृशः सः ? महर्षभयातः महोक्षस्य इव यातं गमनं [यस्य] स तथा । दोलायति इति कण्ड्वादिपाठात् यक् इति शिवभद्रटीका समाप्ता ॥९२॥

---

१. 'मित्रमेव' अस्ति ।
२. अस्य श्लोकस्य पु॰ टीका नास्ति ।
३. सन्नेत्रस्य इयम् ।
४. सन्ने त्रस्येयम् ।

ज्योत्स्नांशुकपरिधाना आशायत्तस्य
जनयन्ति शोकमतुलमाशा यत्तस्य ।
अद्यापि यच्च कपयः समाह्रियन्ते
न स्खलितमुपनेतुमर्हति समा ह्रियं तेन ॥९३॥

शां० ज्यो० ॥ तेन कारणेन च लक्ष्मणो मम ह्रियं[1] लज्जां स्खलितं क्षणमुपनेतुं ढौकयितुम् अर्हति योग्यः भवति यत् यस्मात् तस्य रामस्य (आशाः दिशः शोकं शुचं दुःखं जनयन्ति । कीदृशम् ? अतुलम् अप्रमाणम् । कीदृशस्य ? तस्य)[2] आशायत्तस्य मनोरथाधीनस्य[3] । कीदृश्यः आशाः ? ज्योत्स्नांशुकपरिधाना चन्द्रकान्तिवस्त्रच्छादनाः । यतः तथा यच्च यस्मात् च अद्य अपि अधुना अपि कपयः वानराः न समाह्रियन्ते न मील्यन्ते ॥९३॥[4]

वीक्ष्य शरन्मुखमुडुपतिविशेषकोपेतं
प्रणयेन वर्तमानं विशेषकोपे तम् ।
कृत उपकारः सख्यं न वञ्चनामेति
अस्मद्विधमनुगमयन्नवं च नामेति ॥९४॥

शां० ॥ वीक्ष्य ॥ स लक्ष्मणः न वञ्चनां स्खलनम् एति गच्छति । किं कारयन् ? अनुगमयन् योजयन् । कथम् ? अस्मद्विधं मादृशम्[5] । कम् अनुगमयन् ? तं रामम् । कथम् ? कृत उपकारः सख्यं न वञ्चनामेति । कृतः विहितः अस्माभिः भवतामुपकारः तारासमर्पणः (?णम्) लक्ष्मण ! तथा सख्यं मित्रत्वं च नवं नूतनं कृतं भवद्भिः सह अस्माभिः । कथं नाम व्यक्त इति अनेन प्रकारेण । कीदृशम् तम् ? वर्तमानं तिष्ठन्तम् क ? विशेषकोपे अधिकक्रोधे ।[6] किं कृत्वा ? वीक्ष्य अवलोक्य । किं तत् ? शरन्मुखं शरत्कालप्रारम्भः । कीदृशम् ? उडुपतिविशेषकोपेतं चन्द्रतिलकयुक्तम् ? केन वीक्ष्य ? प्रणयेन प्रीत्या ॥९४॥[7]

१. क्षा० 'मामह्रियं' अस्ति ।
२. म० नास्ति ।
३. म० 'मनोरथाधारस्य' अस्ति ।
४. अस्य श्लोकस्य पु० टीका नास्ति ।
५. क्षा० मा मद्वा अस्ति ।
६. क्षा० नास्ति ।
७. अस्य श्लोकस्य पु० टीका नास्ति ।

शां० ।। (क्षा० प्रति) इति पूर्णतल्लगच्छसंबन्धिश्वेताम्बरश्रीशान्तिसूरिविरचितायां शिवभद्रकाव्यवृत्तौ द्वितीयः आश्वासकः समाप्तः। समाप्ता इयं शिवभद्राख्यकाव्यवृत्तिः।

वृन्दावनादिकाव्यानां पञ्चानां वृत्तिम् उज्ज्वलां कृत्वा ।

अर्जितं मया पुण्यं तेन यान्तु शिवं जनाः ।

श्रीः अस्तु । संवत् १६५३ वर्षे कार्तिक सुदि ८ दिनसोमवा[स]रे पण्डित-पुरन्दरपण्डितश्री श्री श्री श्री श्री श्री श्रीकमलविजयशिष्यगणिकीर्तिविजयपठनार्थम् । मुहूर्तादेव लिखितं निर्जरार्थे । श्रीजालोरनगरे ।।

शां०।। (म० प्रति) । श्री पूर्णतल्लगच्छसंबन्धिश्वेताम्बरश्रीशान्तिसूरिविरचितायां शिवभद्रकाव्यवृत्तौ द्वितीयः आश्वासकः समाप्तः । ब । संवत् १९५१ मिति भादरवा वद १० शुभं भवतु । श्रीरस्तु । कल्याणमस्तु ।

श्रीः श्रीः श्रीः श्री श्रीः श्रीः ।।

जम्बूकविकृतम्

चन्द्रदूतकाव्यम्

संपादकः पं० हरिशंकर अ० शास्त्री

चन्द्रदूतनामकमिदं काव्यं गम्भीरार्थकम् यमकालङ्कृतं रसप्रदं च। जम्बूनाम्ना कविना व्यरचि इदम् काव्यम् मालिनीच्छन्दोनिबद्धम्। अस्योपरि श्रीशान्तिसूरिकृता वृत्तिर्विद्यते।

अस्य कवेर्जम्बूनाम्नः परिचयो न कश्चित्समुपलभ्यते। वृत्तिकारस्य श्रीशान्तिसूरेस्तु परिचयो मत्सम्पादितस्य मेघाभ्युदयकाव्यस्याऽऽमुखादेव समवगमेयः।

अस्य काव्यस्य हस्तलिखिते द्वे प्रती लब्धे। एका ला. द. भा. सं. वि. मन्दिरसुरक्षितश्रीमहेन्द्रविमलसङ्गृहीतभाण्डागारस्य डा०नं-२० क्रमाङ्क ११४२ अङ्किता। अस्याः परिचयस्तु मेघाभ्युदयकाव्यादस्मत्सम्पादिताज्ज्ञातव्यः। अन्या तु ला. द. भा. सं. वि. सम्बन्धिनी सू० ७२२५ क्रमाङ्का आयामपृथुत्वयोः २८×१३ सेन्टीमिटरप्रमाणा पत्रषट्कमिता च। तत्र प्रतिपत्रं षोडश पङ्क्तयः सन्ति प्रतिपङ्क्ति च प्रायः चतुश्चत्वारिंशदक्षराणि सन्ति। अस्याः प्रान्ते पुष्पिका विद्यते। तथाहि—

चन्द्रदूतस्य काव्यस्य वृत्तिं कृत्वा सुनिर्मलाम्।
यदर्जितं मया पुण्यं तेन निर्वान्तु देहिनः॥

अनयोः हस्तप्रत्योः द्वितीया केन कुत्र लिखिता इति तु न निर्दिष्टम्। प्रथमाया अन्ते इयं पुष्पिका विद्यते

चन्द्रदूतस्य काव्यस्य यथाबोधं कृता मया।
वृत्तिर्जनावबोधाय शोधनीयाः सुपण्डितैः॥

अस्याः प्रतिपरिचयस्तु मेघाभ्युदयकाव्यस्य ला. द. वि. मं. प्रकाशितस्य मत्सम्पादितप्रतितोऽवगन्तव्यः।

इमे प्रती प्रायः शुद्धे समीचीने च।
प्रथमायाः प्रतेरन्ते अन्या अपि पुष्पिका एवं विद्यते—

वृन्दावनादिकाव्यानां पञ्चानां वृत्तिमुज्ज्वलाम्।
कृत्वाऽर्जितं मया पुण्यं तेन यान्तु शिवं जनाः॥ श्रीरस्तु।

संवत् १६५३ वर्षे कार्तिकसुदि ८ दिनसोमवा[स]र पण्डितपुरन्दरपण्डित-श्रीश्रीश्रीश्रीश्रीश्रीश्रीकमलविजयगणिशिष्यगणिकीर्तिविजयपठनार्थं मुंहतादेवालिखितं निर्जरार्थे जालोरनगरे ॥

एतादृशि यमकान्वितानि काव्यानि क्लिष्टानि अतः तेषामर्थो न सरलतया स्यात्। अतः प्रासादगुणस्य हानिः सञ्जायते परन्तु चमत्कृतिप्रदानि तु अवश्यमेव भवन्ति अतः वाचकानां रुचिकराणि जायन्ते। यद्यपि क्लिष्टत्वाद्रसक्षतिस्तु अवश्य-मेव भवति तथापि यमकत्वात्पठने पदानां छेदने च आनन्दोऽपि भवति विदुषाम्।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः

हसन्ति दुर्जनास्तत्र समादधति पण्डिताः ॥ इति शम् ।

चन्द्रदूतकाव्यस्य वस्तुनिरूपणम् ।

जम्बूकविश्चन्द्रदूतकरणे प्रवर्तमान आदौ मङ्गलार्थमिष्टदेवतां स्मरति।

वर्षाकाले चन्द्रज्योत्स्नया पीड्यमाना अहंकारात् गतबुद्धिः सती या स्त्री प्रियं लक्षीकृत्य ऊचे। या मया सह प्रचल इति विनयं धारयन्तं प्रियं न जगाम। तां प्रियहितां मां हे शिशिरकिरण ! त्वं रक्ष। तव चन्द्रिका प्रिययुक्तायां वध्वा-मन्तःकरणविकृतये भवतु। अपि च हे चन्द्र ! अपरमपि त्वं शृणु। यदि कथमपि कान्तः दृक्पथं गच्छेत् तदा सस्मितं क्षणमिदमभिधेयः। हे शठहृदय ! विरहदहन-दग्धा त्वन्महेला खिद्यते तथापि त्वया किमास्यते। वियति हंसा हंसीयुक्ता रत्या भ्रमन्ति हे त्यक्तदार ! रागयुक्तं मम चेतः सर उपान्ते सरति। हे पथिक ! त्वां विना मम शिरः शोभारहितम्, वक्षः मुक्तारहितं, शं च विनाशं प्राप्तम्। अधुना तरुणो मन्मथाधीनदेहां निजस्त्रीमिव कलमः नलिनीं प्रणमति। धवलकैरवखण्डः, कमलमपि मम विनाशाय प्रभवतः। मधुकरः अपि मधुरमधुरसाढ्यं पद्मिनी-नायिकाया अम्भोरुहास्यम् आपीयते। कामपुलिन्दः मधुपराजीज्याजटङ्कारतः निर्मला-कालजलमारूढः इमं जनं विनाशं नयति। मयूरी च भर्त्रा युक्ता सुखं भुङ्क्ते अहं तु एकाकिनी अतः न सुखमनुभवामि। गच्छता भवता उपवनम्, रत्यगारं उपा च न व्यगणि। हे शठ ! इयं तव भार्या कथं स्मृतिपथं नोपयाति ? यद्वा ज्ञातं तव प्रेयसी अन्या अतोऽहं त्वया न स्मर्ये। तव अन्या नारी रतवरदा जाता तर्हि अबलाया मे मरणमेव चेष्टा भवतु। हे अनृतवादिन् ! त्वमेव मम वल्लभाऽसि इति वचनम् तव क्व गतम् ? पुरुषो भयेन असत्यं भाषते परन्तु नाहं

तुभ्यं कुपिता अतो नास्ति मत्तः किञ्चित्ते भयम् । तथापि अहं त्वां विना तव बिम्बेन दिनं रात्रिं च शीघ्रं गमयामि । तव भार्यायाः कुचकलशविभूषा मुक्ताकलापोत्पाद्या नयनविगलदस्रैः जन्यते । त्वद्भार्यां भासमाना द्यौः विमलसरः अंश्च हसतः । तव भार्या कथितभवदुदन्ताय जनाय द्रव्यं भोजनं च ददाति । त्वं तु पुनः अविदिततदवस्थः आस्से । अतः निःस्नेहत्वाद् भवतः किं वाच्यम् । हे प्रिय ! मम सर्वा मुद् गच्छति । तथा त्वयि उत्कण्ठा भवति इह शरत्काले विहायःश्रियम् दृष्ट्वा, तथापि त्वं किमर्थम् आस्से प्रियत्वं विहाय ।

इति सन्दिष्टश्चन्द्रः उदयाचले अस्ताचले वा प्रीतिम् अकृत्वा प्रियाय कथयितुमिव अम्बराध्वनि सरति इति ।

❁

स्फुरदमलशिलायां वर्त्तिकान्तेन सारं
यदभिलपति बिम्बं तावकं तेन साऽरम् ।
नयति दिनमुषां च त्वत्कृतानीह माना-
हितविरहितचेतास्सद्रतानीहमाना ॥१७॥

स्फुर० । सा तेव भार्या अरं शीघ्रं नयति गमयति । किं तद् ? दिनं दिवसं तथोषां च रात्रिं च । केन नयति ? ते तव बिम्बेन । यद् बिम्बम् अभिलषति । कीदृशम् ? सारं प्रधानम् । तथा तावकम् भवदीयम । कस्याम् ? स्फुरदमलशिलायाम् । देदीप्यमाननिर्मलदृषदि । केन लिखितम् ? वर्तिकान्तेन कूर्चिकापर्यन्तेन । कीदृशी ? ईहमाना अभिलषन्ती । कानि ? सद्रतानि शोभन-सुरतानि । कीदृशानि ? त्वत्कृतानि भवद्विहितानि । क ? इह शरत्काले । कथंभूता ? मानाहितविरहितचेताः मानाहितम् अहङ्कारयुक्तम् । मानेन वा कृत्वा अहितं-मा-नाननुकूलं, विरहितं-त्यक्तं चेतो-मनो यया साऽहंकारत्यक्तचित्ता ॥१७॥

कुचकलशविभूषा जन्यते हा रजन्या-
महनि च ननु तस्याः सन्ततं हारजन्या ।
नयनविगलदस्रैर्मौक्तिकैर्वा मतायाः
सुभग ! तव नताङ्ग्याः सत्स्वनेर्वामतायाः ॥१८॥

कुच० । हे सुभग ! तव ते । नताङ्ग्याः तन्वङ्ग्याः कृशदेहायाः तस्याः भार्यायाः । ननु निश्चितं सन्ततं निरन्तरं जन्यते क्रियते । काऽसौ ? कुचकलशवि-भूषा स्तनकुम्भालङ्कृतिः । कीदृशी ? हारजन्या मुक्ताकलापोत्पाद्या । कैः ? नयन-विगलदस्रैः नेत्रपतदश्रुभिः । कीदृशैरिव मौक्तिकैर्वा । मुक्ताफलरचितानि इव । वा इवार्थे । कस्यां जन्यते ? रजन्यां रात्रौ तथा अहनि दिने च । हा कष्टम् । तस्याः कथंभूतायाः ? [मतायाः] अभीष्टायाः । तथा सत्स्वनेः शोभनाकारस्य । कस्याः ? वामतायाः चारुतायाः । रात्रौ दिवा सा रोदिति इत्यर्थः ॥१८॥

निशि निशि हसति द्यौर्भासमानां वरां ता-
मुडुभिरिव सिताभिर्भासमानाम्बरान्ता ।
अपि विमलसरःश्रीः कौमुदाऽऽभासिताऽपा-
मवपुरिपुविषाग्नेः कौ मुदाऽऽभासितापा ॥१९॥

१. भवद् सु० । २. मानानुकूलितं दे०॥ ३. मुक्ताफलैरिव मू०॥ ४. सु० प्रतौ वा इवार्थे इति अधिकम् ५. चारुस्वरस्य सु०॥

निशि०। **तां** त्वद्भार्यां **वरां** श्रेष्ठाम्। तथा **भासमाना** भा दीप्तिस्तयाऽ**समाना** अनन्यतुल्या तां **द्यौः** खं हसतीव। कीदृशी द्यौः? **भासमानाम्बरान्ता** भासमानम(नोऽ)म्बरान्तं(तो) यस्यां यया वा शोभमानवस्त्रममपर्यन्ता। सा। काभिः कृत्वा **उडुभिरिव** नक्षत्रैः। कीदृशीभिः? **सिताभिः** शुभ्राभिः। क्व **निशि** रात्रौ। न केवलं **द्यौर्हसति**। **विमलसरःश्रीरपि** निर्मलतडागलक्ष्मीरपि हसतीव। सा कीदृशी? **कौमुदाऽऽभासिता** कैरवषण्डमण्डिता। कया हसति? **मुदा** हर्षेण। कस्याम्? **कौ** पृथिव्याम्। कीदृशी सरःश्रीः? **आभासितापा**। आभासी प्रभासमानस्तापः सन्तापो यस्याः सा तथोक्ता। कस्य **अवपुरिषुविषाग्नेः** अवपुषः कामस्य। इषुरेव विषाग्निः तस्य। कासां सम्बन्धिनी या सरःश्रीः **अपां** जलानाम् ॥१९॥

कथितभवदुदन्ता योन्मुदा चेतसाऽदात
प्रतिदिनमबला स्वं भोजनं चेतसादा।
अविदिततदवस्थस्तिष्ठसि त्वं गदाङ्ग-
द्युतित! किमिति वाच्यं सत्वरं त्वङ्गदाङ्ग! ॥२०॥

अबला भार्या तदाऽदाद्दत्तवती। कथम्? **प्रतिदिनम्** दिनं दिनं प्रति। किं तत्? **स्वं** द्रव्यम्। न केवलं स्वं **भोजनम्** च। कस्मै? **कथितभवदुदन्ताय** कथित उक्तो भवतस्तवोदन्तो वार्ता येन स तथोक्तः तस्मै। केनाऽदात्? **चेतसा** मनसा। कीदृशेन? **उन्मुदा** सहर्षेण। कीदृशी अबला? **इतसादा** गतश्रमा। त्वं तु पुनः **तिष्ठसि** आस्से। कीदृशः सन्? **अविदिततदवस्थः** अज्ञाततत्स्वरूपी(पो) हे गदाङ्गद्युतित! गदाप्रहरणमङ्कं यस्य स गदाङ्को हरिः। तस्येव द्युतितं दीप्तिर्यस्य स तथोक्तः तस्य आमन्त्रणम्। तथाऽङ्गदाङ्ग!। अङ्गदैराभरणविशेषैः उपलक्षितमङ्गं बाहुर्यस्य स तथोक्तस्तस्यामन्त्रणम्। इति हेतोः किं वाच्यम्? किं वक्तव्यम्?। कथं **सत्वरं** सवेगम्। न किमपि वक्तव्यम्। निःस्नेहत्वाद्भवत इत्यर्थः।

भवति कृतमतेर्मे नैति वध्वा न मुत्का
बहिरभिपततोऽन्यस्यापि निध्वानमुत्का।
भवति निशमयन्त्यास्तां प्रियत्वं विहायः-
श्रियमिह किमवेक्ष्यास्से प्रियत्वं विहाय ॥२१॥

हे **प्रिय**! इष्ट! कामिन्! का **मुद्**? को हर्षः? **मे** मम **वध्वाः** न **न एति**। अपि तु सर्वा मुद् गच्छति। कीदृश्याः? **कृतमतेर्विहितबुद्धेः**।

१. स०प्रतावधिकम्। २. इदमपि अधिकम्।

क्व ? **भवति** त्वयि । तथोक्ता उत्कण्ठा मम भवति । किं कुर्वत्याः ? **निशमयन्त्या** आकर्णयन्त्याः । कम् ? **निध्वानं** शब्दम् । कस्य ? **अन्यस्यापि** । किं कुर्वतः ? **अभिपततः** आगच्छतः । क्व ? बहिः गृहादिति गम्यते । तथा **विहायःश्रियम्** आकाशलक्ष्मीं ताम् **अवेक्ष्य** दृष्ट्वा । क्व ? इह शरत्काले **किम्** ? किमर्थम् **त्वमास्से** त्वं तिष्ठसि । किं कृत्वा ? **विहाय** त्यक्त्वा । किं तत् ? [1]**प्रियत्वम्** वल्लभत्वम् । पाठान्तरम् विकृतमतेरिति । अत्र च व्याख्या । इति पूर्वप्रकारेण **विकृतमते**-विकारापन्नबुद्धेर्मम का **मुत्** ? को हर्षो नैव काचिद इत्यर्थो नञ्द्वयस्य प्रकृतार्थत्वात् ॥२१॥

कतिपयदिनमध्ये संजनेऽक्षामतन्वा
यदि निपतितवत्या सन्ततं क्षामतन्वा ।
सह यदि न तया ते कर्तुमिच्छा ततोऽयं
स नु सपदि सखाऽहन् श्रीगुणाच्छाततोयम् ॥२२॥

इति विविधवचोभिश्चन्द्रमा यामवत्यां
गदित उदयमानो दीनमायामवत्याम् ।
कथयितुमिव तस्मै तूर्णमध्वन्यबध्वा
सरति रतिमिलाभृत्यम्बराध्वन्यबध्वा ॥२३॥युग्मम् ॥

चन्द्रमाः [3]शशी सरति । किं कर्तुमिव ? **कथयितुमिव** । कस्मै ? **तस्मै** प्रियाय । क्व ? **अम्बराध्वनि** आकाशमार्गे । किं कृत्वा ? **अबध्वा** अकृत्वा काम् ? **रतिं** प्रीतिम् । क्व ? **इलाभृति** पर्वते अस्ताचले उदयाचले वा । कथं सरति ? **तूर्णम्** शीघ्रम् । कथम्भूतश्चन्द्रमाः ? **गदित** उक्तः । कया ? **अध्वन्यवध्वा** पथिकभार्यया । कस्याम् ? **यामवत्यां** रात्रौ । कीदृश्याम् ? **आयामवत्याम्** दीर्घायाम् ? कीदृशः ? **उदयमानः** उदयं गच्छन् । कथम् गदितः ? **दीनम्** दैन्ययुक्तम् यथा भवति । कैर्गदितः ? **विविधवचोभिः** नानावचनैः । कथम् ? इति पूर्वोक्तैः हे **श्रीगुणाच्छात** ! श्रीगुणैः शोभागुणैर्दाक्षिण्यादिभिः अच्छातः अकृशः श्रीगुणाच्छातस्तस्यामन्त्रणम् । **सपदि** झटिति ततस्तस्मात् सोऽयं सखा [2]नु निश्चितं तोयं जलं **अहन्** अगच्छत् गतो यदि **ते** तव **नेच्छा** न वाञ्छा । किं कर्तुम् ? **कर्तुम्** विधातुम् । क्व ? **सञ्जने** सङ्गे । कया सह ? तया सह । क्व ?

१. वाल्लभ्यम् सू० ॥ २. ननु दे० ॥ ३. चन्द्रः सू० ॥

कतिपयदिनमध्ये कतिचिद्दिवसाभ्यन्तरे । कीदृश्या तया ? **क्षामतन्वा** कृशतन्वा कृशकायया तथा **निपतितवत्या** पतितया । कथम् ? **सन्ततम्** निरन्तरम् । क्व ? अक्षामतन्वा यदि । अक्षाणि लोचनानि आमयति रुजतीति अक्षामा । सा चामावतन्वा च [1]पञ्च महा बियर्वैकामा पञदासौ तथोक्ता तस्यां सोऽक-रोदनादिना जाताक्षिरोगायेत्यर्थः ।

भिन्नो वा प्रथमः श्लोको व्याख्येयः । तद्यथा –

हे श्रीगुणाच्छात ! तोयं जलं ततः सपदि सोऽयं **सखा** मित्रम् । नु निश्चितम् अहन् गतो यदि तया सज्जने नेच्छाऽस्ति तव कर्तुम् । शेषं पूर्ववत् ॥

द्वितीयस्य व्याख्यानम् । **कथयितुमिव तूर्णं चन्द्रमाः अम्बराध्वनि सरति** गच्छति । कीदृशः ? अध्वन्यवध्वा **गदितः** उक्तः । **कैः** ? विविधवचोभिः । **कथमिति आदिकाव्यप्रभृतिपूर्वोक्तवचनैः** । शेषं पूर्ववत् ।

चन्द्रदूतस्य काव्यस्य वृत्तिं कृत्वा सुनिर्मलाम् ।
यदर्जितं मया पुण्यं तेन निर्वान्तु देहिनः ॥१॥
चन्द्रदूतस्य काव्यस्य यथाबोधं कृता मया ।
वृत्तिर्जनावबोधाय शोधनीया सुपण्डितैः ॥२॥

१–१ अस्पष्टमिदम्

Printed by—Mahanth Tribhuvandas Shastry, Ramananda Printing Press, Ahmedabad
Published by—Dalsukh Malvania, Director, L. D. Institute of Indology, Ahmedaba

...pe

...Journal is primarily intended to ...ote researches in Medieval Indian ...ure. Hence emphasis will naturally ...n the languages, literature and ...ral sources of that period. But it ...also give sufficient space to other ...es which throw light on Ancient ...n Culture.

...s of Contributions

...ributions embodying original ...rches; abstracts of theses accepted ...e University; critical editions of the ...lished Sanskrit, Prakrit, ...bramsa, Old Hindi, Old Gujarati ...appreciations and summaries of ...t and medieval important original ...notices of manuscripts and textual ...isms will be published in the ...al.

...rm of Articles

...should be written in any one of ...llowing four languages: Sanskrit, ... Gujarati and English. ...es written in language other than ...sh should be accompanied by a ...ary in English.

...neration

...L. D. Institute of Indology will pay ...arium to the authors whose ...butions are accepted.

...al Subscription

...	Rs.	20/-
...e	Sh.	30
...A.	Dollar	5 00

Other Rules

(1) Contributions intended for publication in the Journal should be type-written (with double spacing) or legibly written on one side only of the paper. Copies should be retained by the authors.

(2) It is presumed that contributions forwarded for publication in the Journal are not submitted elsewhere.

(3) The copyright of all the contributions published in the Journal will vest jointly in the L. D. Institute of Indology and the authors.

(4) Ten offprints will be given to the contributors free of charge.

(5) Titles of books and Journals should be indicated by single underline. Sanskrit, Prakrit, Hindi, Gujarati terms occurring in the articles written in English should be underlined. The standard system of transliteration should be followed.

(6) Those who want their wroks to be reviewed in the Journal should send two copies of the same.

All contributions and correspondence may please be addressed to

Director, L. D. Institute of Indology, Ahmedabad-9

OUR LATEST PUBLICATIONS

(1972)

32.	Philosophy of Shri Svaminarayana by Dr. J. A. Yajnik	Rs. 30
34.	अध्यात्मबिन्दुः —हर्षवर्धनोपाध्यायनिबद्धः स्वोपज्ञवृत्त्या युतः ; सं० मुनिश्री मित्रानन्दविजयजी — नगीन जी. शाह.	Rs. 6
35.	न्यायमञ्जरीग्रन्थिभङ्गः — चक्रधरकृतः; सं० नगीन जी शाह	Rs. 36
36.	New Catalogue of Sanskrit and Prakrit Mss. JESALMER COLLECTION — Compiled by Munirāja Punyavijayaji	Rs. 40
37.	Prakrit Proper Names Pt. II Compiled by Mohan lal Mehta and K. Rishabh Chandra	Rs. 35
38.	Karma and Rebirth by Dr. T. G. Kalghatgi	Rs. 6
	(1973)	
41.	Collection of Jaina Philosophical Tracts **Ed. Nagin J. Shah**	Rs. 16

SAMBODHI

(QUARTERLY)

VOL. 2 JANUARY 1974 NO. 4

EDITORS
DALSUKH MALVANIA
DR. H. C. BHAYANI

L. D. INSTITUTE OF INDOLOGY AHMEDABAD 9

CONTENTS

Notices on Buddhist Architecture in
Western Indian Vāstuśāstras

M. A. Dhanky

History and Culture of Gujarat of the
First Four Centuries after Christ

Rasesh Jamindar

Seminar on Jainism—A Report

Nandisuttam and Aṇuogaddārāiṃ—Reviewed

V. M. Kulkarni

न्यायवैशेषिक दर्शनमें ईश्वर

नगीन जी. शाह

અર્વાચીન તત્ત્વજ્ઞાનમાં ભાષાવિચાર

હ. ચૂ. ભાયાણી

લોથલ : ભારતની નગરસંસ્કૃતિનું અગ્રણી
આદિ કેન્દ્ર

રસેશ જમીનદાર

अज्ञातकर्तृक नेमिजिन चरित्र

पं बाबुभाई सवचंद शाह

NOTICES ON BUDDHIST ARCHITECTURE IN WESTERN INDIAN VĀSTUŚĀSTRAS

M. A. Dhanky

After the close of the seventh century, Buddhism progressively dwindled in strength in Western India. It speedily decayed in the subsequent century, and, by the ninth, died out even in the last pockets where it had lingered on for some time.[1] Not only that; just before the medieval epoch, Buddhism's place was fully and decisively taken over by the resurgent Jainism.[2] The first three centuries after the tenth was the period of Jainism's highest expansion as well as the high water-mark of its glory and influence in Rājasthān and Gujarāt. The early Western Indian *Vāstuśāstras* copiously but also reverentially refer to the Jina image and Jaina secred architecture : For the Jainas accorded the major and continuous patronage to the Māru–Gurjara art and architecture. In those days of ascendency and glory of Jainism, and the total eclipse of the Buddhist creed, a notice apropos Buddhist architecture inside Western Indian *Vāstuśāstras* is hardly to be expected. And yet, surprisingly enough, there at least are two brief but significant allusions to Buddhist structures, one to the *vihāra* and the other to a *prāsāda,* which, by the associated details, seems in that context to imply *stūpa.*

The reference to the *vihāra* or Buddhist monastery is found in the *Vāstuvidyā* of Viśvakarmā, a Māru–Gurjara *vāstu* manual of about the first quarter of the twelfth century.[3] The second notice which concerns with *stūpa* was encountered in the *Vṛkṣārṇava,* a *vāstu* work of a period as late as the mid fifteenth century.

The *Vāstuvidyā* sandwitches the *vihāra* description just between the *jagatī*-s affiliated to Brahmanical shrine and the

jagatī of the Jaina sacred building The original verse I shall first cite, followed by its translation:

[Viśvakarm=ovāca]

Vihāram yāddiśam proktaṁ tāddiśaṁ kathayāmyaham ॥
Madhye sthāpyah Budhaś=śrīmān agre citrena bhūṣitam ।
Tārā-harmya samopetam yakṣa-vṛnda-gaṇ=ānvitam ॥
eka-bhaumam dvi-bhaumam vā tri-bhu=ūrdhvam na kārayet ।
Citraśālā samopetaṁ upavarnaka-sankulam ॥

—*Vāstuvidyā, Jagatīlakṣaṇādhyāya, 72″–73″.*

[And Viśvakarmā said :]

"I am (now) telling [You, Jaya !] about the *vihāra* in the way it has been (earlier) said. In the centre (i.e. central cell), install the auspicious (image of) Budha (i.e. Buddha): And above (the image, i.e. the ceiling) be ornamented with painting. [Let the *vihāra*] have a chapal of Tārā,[4] with *yakṣa*-spirits and *gaṇa*-goblins. [The *vihāra* can be] one storeyed, or two storeyed; but it must not (in any case) be over three storeyed. Let the *vihāra* have a painted hall,[5] articulated with *upavarṇaka* (subsidiary shrines ? aisles ? columns ?)"

The *vihāra*'s description invokes the memories of the rock-cut *vihāra*-s at Ajaṇṭā, Elloṛā and Auraṅgābād : The painted hall, of Ajaṇṭā, the Tārā-chapel, of Aurangābād; and the storeyed character, of the Dothal and Tinthal Buddhist caves of Elloṛā. *Vāstuvidyā*'s description is seemingly based on some earlier source on *vihāra* architecture. The opening line apparently supports this conjecture.

We may next consider the reference in the *Vṛkṣārṇava*.[6] The passage referring to a Buddha's shrine is an follows :

dvāra-hīnam ca prāsādam Buddhadeva=sya (kāritah ? kīrtitah) ॥
Dvāra-sthāne kṛtā ālāś=caturdiksu vyavasthitāh ।
brahmasthāne ca samsthāpyaṁ yogadhyāna (pravartate) pravartitam) ॥

— *Vṛkṣārṇava*, 145 / 9″–10″

"Lord Buddha's shrine is constructed *without doors*. In (the customary) door-positions, niches[7] are to be made along the cardinal directions. In the central position[8] may be set up the image lost in contemplation."

The doorless Buddhist shrine with niches (implied to bear Buddha figures ?) is very probably the *stūpa*, of the type that became popular from the seventh century onwards.

The two references here discussed, are, though succinct, valuable since notices on Buddhist sacred art and architecture in *vāstu* manuals are rare to encounter.

NOTES AND REFERENCES

1 *Vide* Umakant Premanand Shah, " Gujarāt-mān̄ Bauddha-dharma ", *Svādhyāya*, Vol. I, No. 3, May 1964.

2 The destruction of Valabhī in about 784 was a set-back to Jainism in Gujarat. But fresh waves probably emanating from Mathurā invigorated Jaina movement in Wastern India as a whole.

3 The work is being edited at present by Shri Prabhashankar O. Sompura and myself.

* Jaya is the first of the four mind-born sons of Viśvakarmā. The *Vāstuvidyā* is in a dialogue form between Viśvakarmā and Jaya.

4 *Tārā-harmya*, as the text so refers.

5 Called *citraśālā* in the citation.

6 This work, too, is being edited by Sompura and myself.

7 The text uses the term *ālā* for the niche. *Ālaka* and *ālā* for niche are known from the fifteenth century epigraphical and literary sources in Western India.

8 *Brahmasthāne* as the text enjoins.

An Abstract of the Thesis of Dr. Jamindar entitled

HISTORY AND CULTURE OF GUJARAT OF THE FIRST FOUR CENTURIES AFTER CHRIST

Rasesh Jamindar

1 It is proved that the Western Kshatrapas were independent kings and not the Viceroys of the Kushānas : (*a*) the findspots of epigraphic records and coins of the Kushānas do not include Gujarat, where the Western Kshatrapas ruled for more than three centuries. (*b*) Kaniṣka's epigraphs also do not include the name of Bhūmaka and Nahapāna as Viceroys, as in the case with Kharapallana, Liaka etc. (*c*) The Western Kshatrapas always styled themselves as "Rājā Kshatrapa" and "Rājā Mahākshatrapa" which show their independent status. (*d*) The meaning of the word 'Kshathrapāta' is Bhūmipāla i.e. Bhūpala, according to which Western Kshatrapas seem to be Bhūpala. The name Bhūmaka assumes a new significance if we consider it to be identical with Bhūmipāla.

2 It is also interpreted here that the meaning of the word 'Kshatrapa' is not Viceroy but King according to the literary meaning of the Iranian word 'Kshathrapāta' and Indian word ' Kshatrapa '.

3 Almost all the scholars have unanimously taken it to be granted that Vimalasūri's "Paumacariyam" chronologically stands first. But in this thesis it is argued against this well-established theory and tried to put forth one new argument. Scholars do not agree with the date of this work of Vimala, though they do agree with the view that it is the first work of its kind. But according to recent studies the correct date of the composition of this work should come to 530 V.E. i.e. 473 A.D. In this thesis with the help of this date it is shown that it was Mallavādisūri who wrote the first big poem

namely "Padmacarita" based on Rāma story. This Mallavādisūri lived sometime between 317 & 397 A.D. He wrote "Padmacarita" consisting of 24000 verses. Thus Mallavādisūri is earlier than Vimalasūri and therefore the credit of Jaina version of Rāmāyaṇa goes to Mallavādi and none other.

4 Scholars generally opined that the Kshatrapa rule ended in or after Śaka Era 310 i.e. 388 A D., the date which is published by Prof Rapson. Then in 1960, K. V. Soundararajan published two lead coins of Swāmi Rudrasimha 3rd, bearing the date Śaka year 314 i.e. 392 A.D But here in this thesis the writer has cited and published one Kshatrapa coin found from a private collection of S. M. Shukla of Bombay, which is dated in Śaka year 320 i.e. 398 A.D. Till today this is the last known date of the Kshatrapa chronology. Conclusion is that the end of the rule of Western Kshatrapas may be placed sometime after the Śaka year 320 i.e. 398 A D.

5 It is welknown fact that coins do help a lot to know the Historical Geography of a King or Dynasty. But this writer in this thesis has questioned this very popular belief and tried to show some limitations which do come in the way : The modern places of coin-hoards may well fall within King's territory who issued them is rather exaggerated. Sometimes it so happens that a king, who issued coins, may be a fudatory chief of some great king, giving latter the rich tribute in currency of his own normally every year. In this condition it is quite possible to find a coin-hoard of that fudatory chief within the boundaries of his overlord. So from this one cannot easily fix up the historical geography of any king or dynasty just with the help of coins. Likewise, the question comes in our way while using the coin hoards either from public places, hill resorts or places of religious importance. In the same way circulation of currency from one state to another in the absence of exchange system is also possible. In such circumstances it is very difficult to fix boundaries just from coin-hoards.

